।। श्रीः ।।

# विश्वविद्या

**VOL-2**

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

Internationally Recognized Refereed & Peer reviewed Research Journal


**सम्पादकः**

डा. आर् . विटोबाचार्यः



**प्रकाशनम्**

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

२०२२

विश्वविद्या VOL-2
अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

सम्पादकः
डा. आर् . विटोबाचार्यः

प्रकाशनम्
वेद-वेदान्ताध्ययनशोधसंस्थानम् , वसन्तकुञ्ज, नवदेहली
2022

पुटसंख्या-112
प्रतयः-50

मूल्यम्-100/-

ISBN-

विन्यासः- श्रीकरः कुलकर्णी

मुद्रणम् - वागर्थ मुद्रणालयः

।।श्रीः।।

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीपेजावर-अधोक्षजमठः, उडुपि

श्रीपरमपूज्यानां श्रीविश्वप्रसन्नतीर्थश्रीपादानाम्

## आशीर्वचः

निर्गते सति खद्योते खद्योतो द्योतते तराम् ।
नूनं स एव खद्योतो खद्योतानां प्रभासते ।।

रविः कीटश्च खद्योतौ निशि कीटो रविर्दिवा ।
विश्वविद्याख्यखद्योतो द्योतिषीष्ट दिवा निशि ।।

नोपरागे प्रकाशेते पुष्पवन्तौ विभावसू ।
विश्वविद्या दोषमुक्ता द्योततां विदुषां हृदि ।।

इति

श्रीविश्वप्रसन्नतीर्थश्रीपादाः

# सम्पादकीयम्

आत्रिवर्षं शैशवम् । ततस्त्रिहायनं पौगण्डम् । इदं बाल्यपदव्यपदेश्यम् । तत्राप्यादन्तजननाच्छिशुः। आत्रिवर्षं बालकः । ततस्त्रीणि वर्षाणि बालः । तत आचतुर्दशं कुमारः । कुमारमुपनीय गुरुकुलं प्रवेशयन्ति । कौमार एवायमधीत्य वेदान् कण्ठगतान् करोति। तत आपीच्यं वयः पञ्चदशं षोडशञ्च । यस्मिन् वयसि प्रथमा रोमराजिः श्मश्रुसङ्घश्चोन्मिषति । संप्रति वेदाङ्गानि वेदान्तञ्चाधिगच्छति । आषोडशाद्यौवनम् ।।

लिखति शिशुः । ता रेखाः । लिखति बालकः । तच्चित्रम् । लिखन्ति बालाः कुमाराश्च । नैतच्चित्रम् । तदिदं लेखनमुच्यते । निबन्ध इति च गीयते । एतस्मिन् वयसि लेखको गुरुमार्गदर्शनमपेक्षते । गुरुदर्शितपथा लिखन्तो बालाः लोकमार्गदर्शकं प्रबन्धमाबध्नन्ति ।

वचनं सुकरम् । लेखनं दुष्करम् । ये सुष्ठु बोधने समर्था भवन्ति तेषां लेखः सुग्रहो मनोहारी च भवति । बोधनसामर्थ्यं श्रवणपठनचिन्तनाभ्यास-जन्यम् । अतः पठनश्रवणादिकं लेखने पर्यवस्यति । लेखनं पठनादेर्निकषो भवति। अनेके गद्यं कवीनां निकषं वदन्ति । वयन्तु सरसं सुबद्धं पद्यमपि च्छात्राणां निकषं ब्रूमः । वज्रं निकषेण परीक्ष्यते । विदग्धाः लेखनेन परीक्ष्यन्ते ।।

दशकृत्वः पठितमपि विस्मरन्ति सद्यो विस्मरणशीलाः । परं सकृल्लिखितं न तथा विस्मरन्ति । अतो लेखाभ्यासः सर्वैर्विधेयः ।

नानाविधानि सुगन्धीनि लेखपत्राणि पद्यपुष्पाणि चात्र विलसन्ति । कानिचन प्रभाते कोरकाणीव विकसन्तीव । एभिः सुमनोभिः समभ्यर्च्यते गुरूणां कुलपतीनामन्तर्यामी ।।

**इति**

**डा ।। डा. आर् . विटोबाचार्यः**

# Review Board as -

**Dr. Shrinidhi Pyati**
**Ass.** Prof. (**Research**)
Poornaprajna Samshodhana Mandiram

**Dr. Vinay Desai**
**Ass.** Prof. (**library**)
Poornaprajna Samshodhana Mandiram

**Dr. Hayavadana B. S.**
**Ass.** Prof. (**Research**)
Poornaprajna Samshodhana Mandiram

**Dr. Venkatesha Kulakarni**
**Lecturer-**Poornaprajna Vidyapeetha

**Dr. L. Sudheendra**
**Lecturer-** Poornaprajna Vidyapeetha

## विषयानुक्रमणिका


*सम्पादकीयम्

| | | |
|---|---|---|
| 1. प्रमाणविरुद्धत्वम् उपाधिः | - तिरुमलाचार्यः पि. कुलकर्णी | 10 |
| 2. विष्णुतत्वविनिर्णयः | - जे.गोपालकृष्णाचार्यः | 14 |
| 3. चन्द्रिकायां भोक्त्रधिकरणम् | - डा.एल्.सुधीन्द्राचार्यः | 19 |
| 4. प्रवाहतोऽनादित्वविचारः | - डा.सञ्जीवाचार्यः देशपाण्डे | 25 |
| 5. उपक्रमादुपसंहारः प्रबलः | गुरुराजाचार्यः कल्कूरः | 27 |
| 6. एकार्थीभावः | - गुरुराजाचार्यः कुलकर्णी | 29 |
| 7. धनुर्मासः | - श्रीनिवासः गुरुभीमः जोषी | 32 |
| 8. श्रीराघवेन्द्रतीर्थानां गीताविवृतिव्याख्यानम् | - वासुदेव. जे. | 35 |
| 9. पुराणानामध्ययनक्रमः | - कृष्णः पुरोहितः | 37 |
| 10. द्वैतमतरीत्या मोक्षसाधनम् | सुशीलेन्द्र श्रीपाद गोग्गि | 40 |
| 11. श्रीमहाभारतयुद्धे श्रीकृष्णपात्रम् | - आर्.विटोबाचार्यः | 42 |
| 12. किमिदमवच्छेदकत्वम्?- | डा. श्रीनिधि | 45 |
| 13. चोदनालक्षणोऽर्थो धर्मः | - श्रीवत्स.जे. | 48 |

**14.Sadacharasmruthi** **Ashwij, 2th Std** **51**

**15.Why should we worship God?** **Shrinidhi. C. Bhat .** **53**

**16.Ashtavakra in Mahabharata** **Shrivatsa. P. Badri** **55**

**17.FESTIVALS COUNTRY** **Sanket kulkarni** **59**

**18.Kapil Dev RamLal Nikhanj** **-Aniruddha Deshpande,** **62**

**19.SANSKRIT** **- Sanket kulkarni** **64**

**20.Matter, Space, and Time: A Comparative Analysis of Scientific and Vedic Perspectives -dr. Srinidhi V** **68**

**21.Theories of Creation in Nyāya-Vaiśeṣika Philosophy: An Atomic Perspective** -Satyam Pathak 76

**22.The Mīmāṃsā Perspective on Language: A Philosophical and Semantic Analysis** -Anurag G Raichur 84

**23.Mīmāṃsā Theory of Sentence and Meaning: A Structural and Semantic Analysis** Srikar R Kulkarni 96

**24.Perspective and Scope of the Semantics of Pūrvamīmāṃsā**
-Venkatyesh n kulkarni 103

*****

# संस्कृतविभागः

# प्रमाणविरुद्धत्वम् उपाधिः

- तिरुमलाचार्यः पि. कुलकर्णी
अलंकारप्राध्यापकः,
पूर्णप्रज्ञविद्यापीठम्

**वादादयः प्रकरणस्फुलिङ्गाः तनवोऽप्यलम् ।**
**विपक्षकक्षं क्षिण्वन्ति मारुतेन त्वयेरिताः ।।**

इति श्रीत्रिविक्रमपण्डिताचार्यैः श्रीमध्वाचार्याणां प्रकरणग्रन्थविषये स्तुतिः विहिता । तत्तादृशेषु प्रकरणग्रन्थेषु चतुर्थं प्रपञ्चमिथ्यात्वानुमानखण्डननामकं विराजते । अयमस्य ग्रन्थस्य अतिशयः यत् अस्य प्रपञ्चः तत्वोद्योतः, तद्विस्तारः वादावली, तद्विवरणं वादरत्नावली, तस्याः प्रपञ्चः अखिलविद्वन्मान्यं न्यायामृतम् इति ।।

अस्मिन् ग्रन्थे श्रीमध्वाचार्यैः 'विमतं मिथ्या दृश्यत्वात्' इत्यनुमानस्य सर्वे हेत्वाभासाः साधिताः इति दर्शनप्रपञ्चस्य विस्मयावहः अयं विषयः । तत्रान्ते सोपाधिकत्वसमर्थनम् एवमभिहितम्-

यत्र साध्यसाधने हेतुरुच्यते तत्र वादिनः अयमाशयो भवति यत् साध्ये हेतुः प्रयोजक इति । यत्र प्रतिवादी मन्यते 'न भवदुक्तः हेतुः प्रयोजकः, किन्तु अन्य एव' इति, सः अन्य एव उपाधिः इति कथ्यते । यथा पर्वतो धूमवान् वह्नेः इति प्रयोगे कृते धूमसद्भावे न वह्निः प्रयोजकः किन्तु आर्द्रेन्धनसंयोगः इति वक्तुं शक्यते । अयमार्द्रेन्धनसंयोगः उपाधिरिति कथ्यते । तस्यास्योपाधेः लक्षणं शास्त्रीयप्रणाल्या साध्यव्यापकत्वे सति साधनाव्यापकत्वम् । भवति हि आर्द्रेन्धनसंयोगः यत्र यत्र धूमः महानसादौ तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकः । वह्निमति पक्षे अविद्यमानः साधनाव्यापकश्च ।।

तद्वत्प्रकृते मिथ्यात्वस्य प्रमाणविरुद्धत्वं उपाधिरित्याचार्यैः उक्तम् । अस्याभिप्रायं सर्वज्ञकल्पाः श्रीटीकाकृत्पादाः एवमभाणिषुः 'लोके च कस्यचिदर्थस्य सत्यत्वमिथ्यात्वयोर्विप्रतिपत्तौ दर्शनं

सत्यतायां, प्रमाणविरोधं मिथ्यात्वेऽनुसरन्ति, ततो मिथ्यात्वे तदेव प्रयोजकमिति ज्ञायते' इति । अस्यायमाशयः - यथा धूमविषये आर्द्रेन्धनसंयोगः प्रयोजकः न तु बह्निः तद्वत् मिथ्यात्वे प्रमाण-विरुद्धत्वं प्रयोजकं न तु ज्ञानविषयत्वरूपदृश्यत्वम् । अत्र च लोकव्यवहार एव महत्प्रमाणम् । लोके कस्यचिद्वस्तुनः सत्यत्वमिथ्यात्वयोर्विवादे प्राप्ते दृश्यमानत्वात् सत्यम्, प्रमाणविरुद्धत्वान्मिथ्या इति वदन्ति । तेन ज्ञायते मिथ्यात्वे प्रमाणविरुद्धत्वमेव प्रयोजकम् । उपाधिलक्षणमेवं दर्शयितुं शक्यते- यत्र यत्र दृष्टान्ते शुक्तिरजते मिथ्यात्वं तत्र नेदं रजतमिति प्रमाणविरुद्धत्वम् इति साध्यव्यापकत्वं, साधनवति दृश्ये प्रपञ्चे प्रमाणविरोधाभावात् साधनाव्यापकत्वं च ।

अयं चोपाधिः स्वयं पक्षाद्व्यावर्तमानः स्वव्याप्यं साध्यमपि व्यावर्तयन् सत्प्रतिपक्षोन्नायको भवति। यथा विमतं न मिथ्या प्रमाणविरुद्धत्वाभावात् । इदं सत्प्रतिपक्षोन्नायकत्वं अनुमानप्रयोगादनन्तरम्। पूर्वं चेत् व्यभिचारोन्नायकं भवति । तदस्तु नाम ।

अत्रैका शङ्का जायते । मिथ्यात्वं प्रति प्रमाणविरुद्धत्वमुपाधिः इत्युक्तम् । मिथ्यात्वं नाम बाध्यत्वम् । बाध्यत्वं नाम प्रमाणविरुद्धत्वम् । एवं च बाध्यत्वं प्रति बाध्यत्वं उपाधिः इत्युक्तं भवति । परन्तु स्वस्मिन् स्वयम् उपाधिः भवितुं नार्हति । व्याप्यव्यापकभावः भेदव्याप्तः । यत्र व्याप्यव्यापकभावः तत्र भेदः । यथा धूमवह्न्योः । अतः कथमिति शङ्कायां श्रीटीकाकृद्भिरुक्तं ''अन्यथाप्रतिपत्तिपूर्वकं तदुन्मूलनेन सम्यग्बोधः बाधः।प्रमाणविरोधस्तु विपरीतप्रमाणविषयत्वमात्रं इति भेदात्'' इति । अस्यायमभिप्रायः - यत्र प्रथमतः भ्रान्तिः भवति तदनन्तरं तदुन्मूलनेन सम्यग्बोधः भवति । तत्र सम्यग्बोधः बाधः इति कथ्यते । यथा प्रथमतः 'इदं रजतमि'ति भ्रमः जातः, अनन्तरं 'नेदं रजतम्' इति ज्ञानं जातम् । एतज्ज्ञानं पूर्वं ज्ञानं उन्मूलयति । अतः बाधः इति कथ्यते । उन्मूलनं नाम किम् इति शङ्का जायेत । यतः ज्ञानं द्विक्षणावस्थायि । उन्मूलकं, नाम नाशकं, भवतु वा मा भवतु ज्ञानं स्वयं नश्यति । एवं च इदं रजतं इति ज्ञानं स्वयं नष्टम्। तस्य उन्मूलकं नेदं रजतमिति ज्ञानं इत्यस्य कोऽर्थः इति जिज्ञासायां मन्दारमञ्जर्यां श्रीमद्भिः व्यासतीर्थैः 'उन्मूलनं च तद्विषय-असत्वज्ञापनं वा तस्याः भ्रान्तित्वज्ञापनं वा' इति द्रष्टव्यमिति विवरणं कृतम् । एवं च नेदं रजतमिति ज्ञानेन विषयस्य असत्वं ज्ञायते । अथवा ज्ञानेन ज्ञानस्य भ्रान्तित्वं पश्चाज्ज्ञायते इति उन्मूलनं भवति । एवं च बाध्यत्वं नाम अन्यथाप्रतिपत्तिपूर्वकं तदुन्मूलनेन

सम्यग्बोधविषयत्वम् । प्रमाणविरोधस्थले तु एवं अन्यथाप्रतिपत्तिः भवेदेव इति नियमः नास्ति । यथा कश्चन दिनद्वये एकवारं सन्ध्यावन्दनं क्रियते चेदलमिति जानाति तस्य 'अहरहः सन्ध्यामुपासीत' इति श्रुतिवाक्येन विरोधः अस्ति । एवं चात्र प्रमाणविरोधः अस्ति परन्तु तत्र येन प्रमाणमुल्लिख्यते तस्यैव भ्रान्तिः भवेदिति नियमः नास्ति । एवं च बाधस्थले तादृशनियमः वर्तते प्रमाणविरोधस्थले तादृश नियमः नास्तीति तयोर्भेदः वर्तते ।

अन्यथाप्रतिपत्तिपूर्वकं तदुन्मूलनेन सम्यग्बोधः बाध इत्यत्र मन्दारमञ्जर्यां दलकृत्यविचारः कृतः । अत्र सम्यक्, अन्यथाप्रतिपत्तिपूर्वकं, तदुन्मूलनेन इति पदानां कृत्यं वर्तते । तत् पश्यामः । सम्यग्बोधः बाध इत्येव उक्ते 'अयं घट' इति सम्यग्बोधोऽपि बाधः स्यात् । तदर्थं अन्यथाप्रतिपत्तिपूर्वकं सम्यग्बोध इति वक्तव्यम् । अयं घट इति ज्ञानात्पूर्वं तादृशान्यथाप्रतिपत्तिः नास्तीति नातिव्याप्तिः । अन्यथाप्रतिपत्तिपूर्वकं सम्यग्बोधो बाधः इत्येवोक्ते शुक्तिकायां त्वज्ञानानन्तरमेव शुक्तौ इदम् इति यः सम्यग्बोधो भवति सोऽपि बाधः स्यात् । वस्तुतः नेदं रजतमिति एव बाधः न तु केवलं इदम् इति ज्ञानम् । अतः तत्रातिव्याप्तिः । तदर्थं तदुन्मूलनेनेति वक्तव्यम्, उन्मूलप्रकारश्च पूर्वम् उक्तः । विषयस्य असत्वप्रतिपादनं करणीयम् । केवलं इदं इति यत् ज्ञानं भवति तेन विषयस्य असत्वज्ञापनं न भवति इति उन्मूलनं न भवति । अन्यथाप्रतिपत्तिपूर्वकं बोधो बाध इत्येव उच्यते चेत्, सम्यक् इति पदं न उपादीयते चेत्, वल्मीके स्थाणुत्वभ्रमानन्तरं, नाम वस्तुतः सः वल्मीकः । तत्र अयं स्थाणुरिति भ्रमः जातः । तदनन्तरं नायं स्थाणुः किं तर्हि? पुरुष इति भ्रान्त्यन्तरं यत्र जायते तत्रापि अन्यथाप्रतिपत्तिपूर्वकं बोधः अस्तीति अतिव्याप्तिः । अतः सम्यग्बोध इति वक्तव्यम् । वल्मीके पुरुषज्ञानं न सम्यग्बोध इति न तत्रातिव्याप्तिः । एवं मन्दारमञ्जर्यां दलकृत्यं निरुपितम् अस्ति । अत्र एका शङ्का जायते यत्र भ्रमः जातः अनन्तरं बाधः न जातः तादृशं स्थलम् अनुपसञ्जातबाधभ्रम इति कथ्यते । न उपसञ्जातः अनुपसञ्जातः । अनुपसञ्जातः बाधः यस्य सः । अनुपसञ्जातबाधश्चासौ भ्रमश्च इति । तत्र मिथ्यात्वं वर्तते विषये रजते, परन्तु प्रमाणविरुद्धत्वं नास्तीति साध्यव्यापकत्वस्य भङ्गः जातः । एवं च, उपाधिलक्षणं न सङ्गच्छते इति शङ्कायाम् अत्र प्रमाणविरुद्धत्वम् इत्यस्याशयः प्रमाणविरोधार्हत्वम् । एवं च तत्र वस्तुतः विरोधिप्रमाणस्याजननेऽपि प्रमाणविरोधार्हत्वं वर्तते इति उपाधेः साध्यव्यापकत्वं न भज्यते ।

अन्ते टीकायां प्रस्तुत एकः विषय अनूद्यते । यत्र यत्र दृश्यत्वं तत्र तत्र प्रमाणविरुद्धत्वम् इति वक्तुं न शक्यते । घटपटादौ दृश्यत्वं वर्तते प्रमाणविरुद्धत्वं नास्तीति खलु द्वैतिनाम् आशयः । परन्तु प्रपञ्चस्यापि प्रमाणविरुद्धत्वं वर्तते । श्रुत्या 'नेह नानास्ति किञ्चन', 'एकमेव अद्वितीयं ब्रह्म' इत्यादि रूपेण मिथ्यात्वं प्रतिपादितम् । एवं च साधनव्यापकत्वमेव अस्तीति चेत् । अस्योत्तरमेवं भवति ''प्रतीतप्रमाणानाम् अन्यथा व्याख्यातत्वात्'' इति । यानि श्रुतीनां वाक्यानि आपाततः जगन्मिथ्यात्वप्रतिपादकानीव दृश्यन्ते तेषां सर्वेषां वाक्यानाम् अन्यथाव्याख्यानं कृतमस्ति । तद्विवरणम् उपनिषद्भाष्यादौ श्रीमदाचार्यैः हृदयङ्गमं कृतं वर्तते । तस्याश्रयेण यदि चिन्तयामः तर्हि एतेषां जगत्सत्वपरत्वमेव वर्तते इति प्रमाणविरुद्धत्वं जगति नास्तीति साधनव्यापकत्वं न सम्भवति ।

ननु यथा विमतं मिथ्या दृश्यत्वात् इति दृश्यत्वहेतुना मिथ्यात्वं साध्यते, तथा विमतं प्रमाणविरुद्धं दृश्यत्वात् इति तेनैव हेतुना प्रमाणविरुद्धत्वमपि साध्यते । अतः साधनव्यापकत्वं सिद्ध्यतीति चेत् अन्योन्योपाधिभावेनापि अनुमानस्य आभासत्वात् इत्युत्तरं दत्तम् । अस्याभिप्रायः - यथा कश्चित् 'अयं नीलः मित्रातनयत्वात्' इत्यनुमानं प्रयुङ्क्ते तत्र शाकपाकजत्वम् उपाधिः, नीलत्वं प्रति शाकपाकजत्वं प्रयोजकं न तु मित्रातनयत्वम् । यदि 'अयं शाकपाकजः मित्रातनयत्वात्' इति वदति तदापि शाकपाकजत्वं प्रति नीलत्वम् उपाधिः । शाकपकजत्वं प्रति नीलत्वं प्रयोजकं न तु मित्रातनयत्वमिति यथा शास्त्रेषु अन्योन्यम् उपाधित्वम् उच्यते तथा दृश्यत्वेन मिथ्यात्वसाधने प्रमाणविरुद्धत्वम् उपाधिः प्रमाणविरुद्धत्वसाधने मिथ्यात्वमुपाधिः इत्ययं विद्यर्थिनां चिन्तनलेखनयोः उपकारकः विषयसङ्ग्रहः ।।

# विष्णुतत्वविनिर्णयः

**- जे.गोपालकृष्णाचार्यः**
**अध्यापकः, पूर्णप्रज्ञविद्यापीठम्**

'अणुसुधा' इत्येव प्रथितः अयं प्रकरणग्रन्थः श्रीमन्यायसुधाध्ययनकर्तृणां पूर्वपीठिकारूपो वर्तते । प्राचीनटीकाकारैः पद्मनाभतीर्थैः, श्रीनरहरितीर्थैः एवं नारायणपण्डिताचार्यैश्च विष्णुतत्त्वनिर्णय इत्येव स्वग्रन्थेषु अस्य नाम लिखितम् । अस्मददृष्टवशात् व्याख्यानद्वयमुपलब्धम् । परन्तु श्रीनरहरितीर्थकृता टीका नोपलब्धा, इदमस्माकं दुर्दैवम् ।

**अस्य ग्रन्थस्य वैशिष्ट्यम्-**

श्रीव्यासतत्वज्ञोक्तरीत्या दिव्यपुरुषः त्रिपाद्रूपी भगवान् पुरुषोऽस्य ग्रन्थस्य देवता । अत एव परिच्छेदत्रयात्मकमिदं वर्तते । गायत्री च त्रिपात् । ''त्रिपदा गायत्री'' इति श्रुतेः । तादृशगायत्र्याः भाष्यरूपत्वमस्य ग्रन्थस्य ।

**गुणैस्ततः प्रसविता वरणीयो गुणोन्नतेः ।**
**भारतिज्ञानरूपत्वात् भर्गो ध्येयोऽखिलैर्जनैः ।**
**प्रेरकोऽशेषबुद्धीनां स गायत्र्यर्थ ईरितः ।।**

इति ऋग्भाष्योक्तरीत्या 'तत्सवितुर्वरेण्यं.....प्रचोदयात्' इति गायत्रीमन्त्रे वर्तमान 'तत्'शब्दार्थ उक्तः- 'निर्दोषाशेषसद्गुणम्' इति । वरेण्यम् इत्यस्य अर्थवर्णनम् - समतीतक्षराक्षरमिति । 'देव'शब्दार्थवर्णनं- सदागमैकविज्ञेयममिति । अथवा सवितृशब्दस्य सवितृत्वमर्थः, तदर्थवर्णनं- समतीतक्षराक्षरमिति । भर्गशब्दस्य भारतिज्ञानार्थत्वम्, तदुपलक्षणम् इति अभिप्रायेण अशेषसद्गुणत्वोक्तिः कृता । एवं च परिच्छेदत्रयरूपस्य अस्य गायत्रीभाष्यत्वं वर्तते इत्युक्तम्।

मङ्गलश्लोके चतुर्थपादेन श्रीमट्टीकाकृत्पादैः इदं समर्थितम्- 'तं देवं पितरं पतिं गुरुतमं वन्दे रमावल्लभम्' इति ।

**'विष्णु'तत्त्वनिर्णयशब्दस्वारस्यम्-**

दैवीमीमांसायां 'विष्णुरेव हितच्छ्रुतेः', 'तंब्रह्मेत्याचक्षते' इति निरन्तरसूत्रद्वयेन ब्रह्मशब्दवाच्यः यः स एव विष्णुरित्युक्तम् । देवतातांतम्ये अन्तिमः विष्णुः, 'अग्निर्वै देवानामवमो विष्णुः परमः' इत्युक्तेः । एवं च विष्णुतत्त्वमेव ब्रह्मतत्त्वम् । अत एव 'अथातो ब्रह्मजिज्ञासा' इति ब्रह्मशब्देनैव प्रारम्भः कृतः । वेद-पुराणादिषु विष्णुपदमेव बहुलं प्रयुक्तम् । विष्णुसम्बन्धि तत्वं विष्णुतत्त्वम् । एवं च ''स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमुच्यते'' इत्युक्तरीत्या स्वतन्त्रभूतविष्णुतत्त्वस्य, तदधीनास्वतन्त्रतत्त्वस्य च निर्णयः अत्र कृतः । अर्थात् क्षराक्षरपुरुषोत्तमतत्त्वनिर्णयः कृतः ।

**ग्रन्थस्यास्य अपरं वैशिष्ट्यम्-**

**एकाकी किल यश्चक्रे पदं मौलिषु विद्विषाम् ।**
**तत्त्वनिर्णयपार्थोऽयं केन नाम न पूज्यते ।।**

इति नारायणपण्डिताचार्योक्तदिशा श्रीकृष्णसारथेः पार्थस्य पुरस्तात् यः कोऽपि प्रतियोद्धा नासीत् विद्विषाम् अधिमौलि न्यस्तपादः एकाकी पार्थः, एवं वैदिक-अवैदिकरूपसमग्रदुर्वादं निराकारोत् अयं ग्रन्थः । एवं च भारतीयतत्वशास्त्रस्य समग्रचिन्तनम् अत्र वर्तते । यथा- वेदार्थनिर्णायके ब्रह्मसूत्रभाष्ये प्रमाणचिन्तनमेवास्ति, न प्रमेयचिन्तनम् । तत्त्वसंख्यान-तत्त्वविवेकादिषु प्रमेयचिन्तनमस्ति, न प्रमाणचिन्तनम् । प्रमाणलक्षणं तु केवलप्रमाणचिन्तनार्थं प्रवृत्तम् । अत्र तु प्रमाण-प्रमेययोः समग्रं चिन्तनम् अस्मिन्नेव ग्रन्थे कृतम् । विष्णोः सर्वोत्तमत्वं-वेदापौरुषेयत्वं च अत्र निपुणतरम् उपपादितम् । शताधिका अवान्तरविषया अपूर्वा ग्रन्थेऽस्मिन् दृश्यन्ते । अत इमम् एकं ग्रन्थम् अभ्यस्य बहुलप्रमाणप्रमेयविचारसमर्थाः भवेयु इति ग्रन्थस्यास्य महत्वं दृश्यते ।

वेदापौरुषेयत्वविषये अनेके आक्षेपाः सम्भवन्ति । तत्र नैयायिकाः वेदप्रामाण्यम् अङ्गीकुर्वाणा अपि ईश्वररचितत्वम् अङ्गीकुर्वन्ति । लोके दृश्यमानानि समस्तान्यपि वाक्यानि येन केनापि कृतान्येव दृश्यन्ते, यस्य वाक्यस्य मूलं नोपलब्धं तस्यापि कर्तृसद्भाव अनुमेयः भवति, 'अप्रमितकर्तृकं वाक्यं वेदरूपम् अपौरुषेयं भवति' इत्युच्यते चेत् (गूढकर्तृकं वाक्यं नाम) केनचित् कृत्वा कृताकर्तृक

प्रसिद्धिमद्वाक्यमपि वेदवाक्यं भवेत् । तस्य कर्तृप्रसिद्ध्यभावात् इत्याक्षेपे कृते उच्यते 'न च स्वयं प्रतिभातवेदैः दृष्टम् अवेदवाक्यं भवति' ।

तदर्थस्तु वेदानां तावत् अविच्छिन्ना अध्ययनपरम्परा वर्तते, 'प्राक्तनमेव इदम् अधीमहे, अध्यापयामश्च' इति अनुभवः गुरु-शिष्ययोः दृश्यते । एवं च अनादिकालतः अध्यापनपरम्परा यत्र वाक्ये अस्ति, तत् अपौरुषेयं वाक्यमिति निश्चेतुं शक्यते । नन्वेवं वसिष्ठादिभिः दृष्टेषु वाक्येषु परंपराविच्छेदसत्वात् तद्वाक्यं कथम् अपौरुषेयं स्यादिति चेत्,

अत्र आचार्या एवमुक्तवन्तः- तेषु वाक्येषु वेदानुसारित्वं वर्तते । वेदविरुद्धः अभिप्रायः तत्र नास्ति, एवं च ते प्रसिद्धाः वेदा एव भवन्ति । एवं वेदानुसारित्वे सत्यपि तेषां वसिष्ठादीनाम् असर्वज्ञत्वात् ते मन्त्राः वेदा एव भवन्तीति कथं निश्चीयते इति चेत्

**विंशल्लक्षणतोऽनूनः तपस्वी बहुवेदवित् ।**
**वेद इत्येव यं पश्येत् स वेदो वेददर्शनात् ।।**

इति ब्रह्माण्डपुराणवाक्यमुदाहृत्य महापुरुषलक्षणेषु द्वात्रिंशत्सु, यः विंशल्लक्षणतोऽनूनः ततोऽप्यधिकलक्षणवान् भगवदनुग्रहविशेषेण यं मन्त्रं ध्यानदृष्ट्या विदित्वा 'अयं वेदमन्त्रः' इति ब्रवीति सः प्रसिद्धवेदवत् वेद एव भवति, इति निश्चेतुं शक्यते । एवं च गूढकर्तृके नातिप्रसङ्गः ।

नन्वेवं वेदस्य अपौरुषेत्वम् अङ्गीकृतं चेत् तस्य प्रामाण्यमेव न स्यात् इति नैयायिकानाम् आरोपः, यतो हि वाक्यप्रामाण्यनिर्धारणे प्रत्यक्षसंवादः भवेत् अथवा फलदर्शनं वा भवेत् । न तावदाद्यः, वेदेन ज्ञापितेषु स्वर्ग-मोक्षादिषु अस्माकं प्रत्यक्षाभावात् । तेषां फलमपि अस्माभिः न दृष्टमिति न द्वितीयोऽपि । एवं च वेदप्रामाण्यं संरक्षितुं ईश्वरकृतत्वमेव अङ्गीकर्तव्यम् । तथा च आप्तोक्तत्वेनैव वेदप्रामाण्यं सिद्धं भवतीति तेषामाक्षेपः ।

अस्योत्तरन्तु वेदप्रामाण्यसंरक्षणार्थं न आप्तोक्तत्वम् अङ्गीकर्तव्यम् । प्रामाण्यस्वतस्त्वाङ्गीकारात् । 'प्रामाण्यं च स्वत एव, अन्यथा अनवस्थानात्' इत्युक्तेः । आप्तोक्तत्वसत्वे प्रामाण्यं, तदभावे तदभाव इति हि वक्तव्यम्, परन्तु यादृच्छिकसंवादिस्थले

आप्तोक्तत्वाभावेऽपि प्रामाण्यज्ञानोदयात् व्यतिरेकाभावः सिद्ध्यति । एवं च ज्ञानोदयसमये सामान्यत इदं प्रमाणम् इत्येव ज्ञानस्य जायमानत्वात् वेदापौरुषेयत्वं निर्बाधं सिद्ध्यति ।

प्रबलः अन्य आक्षेपः- अनेकवर्णानां संयोजनमेव वेदः, वर्णास्तावत् उत्पत्तिविनाशवन्तः । एवं च समुदायिभूतानां वर्णानाम् अनित्यत्वात् तत्समुदायरूपो वेदोऽपि अनित्य एवेति वक्तव्यम् । एवं च नित्यत्वं सर्वथा भज्यते इति ।

अस्य उत्तरन्तु वस्तुतः वर्णानाम् अनित्यत्वेऽपि वेदापौरुषेयत्वस्य न च्युतिः, वेदापौरुषेयत्वम् इत्यस्य न आकाशवत् अनादिनित्यत्वं, किन्तु अनादिकालतः किञ्चिदपि व्यत्यासमप्राप्य एकरूपतः वर्तमानानां वाक्यानां समुदाय एव वेदः ।

वस्तुतः सिद्धान्तरीत्या वर्णाः नित्याः, क्रमोऽपि नित्यः, तेषां दैशिकक्रमस्य सर्वत्र व्याप्तत्वात्, नित्यत्वात् कालिकक्रमस्य च वक्तुमशक्यत्वेऽपि बौद्धिकक्रमः वक्तुं शक्यत एव । प्रवाहतः नित्यत्वम् अङ्गीकृतमिति नाक्षेपावकाशः ।

नन्वेवं 'ऋचः सामानि जज्ञिरे' इत्यादि जननप्रतिपादकानां वाक्यानां का गतिः इति चेत्-

**तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु ।**
**वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया ।।**

**अवान्तराभिमानानां देवानां वा व्यपेक्षया ।**
**नानित्यत्वं कुतस्तेषाम् अनित्यत्वं स्थिरात्मनाम् ।।**

इत्यादि ब्रह्माण्डपुराणोक्तरीत्या नित्यभूतचेतनस्य जननव्यवहारवत् अभिव्यक्त्यपेक्षया, अवान्तराभिमानिदेवानां जननापेक्षया वा 'सामानि जज्ञिरे' इत्यादिव्यवहारः सङ्गच्छते ।

**वेद-पुराणादिष्वपि वेदापौरुषेयत्वं समर्थितम्-**

**तस्मै नूनम् अभिद्यवे वाचा विरूपनित्यया,**
**वृष्णे चोदस्व सुष्टुतिम् ।**

**नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदम् ।**

**श्रुतिर्वाव नित्या, अनित्या वा स्मृतयः, याश्चान्या वाचः,**

**यावद् ब्रह्मविष्ठितं तावती वाक्'**

इत्यादिश्रुतिभिः वेदनित्यत्वम् अपौरुषेयत्वं च सिद्ध्यति ।

★★★

# चन्द्रिकायां भोक्त्रधिकरणम्

**- डा.एल्.सुधीन्द्राचार्यः**

**अध्यापकः, पूर्णप्रज्ञविद्यापीठम्**

श्रुत्यर्थनिर्णायकन्यायग्रथनात्मकं हि ब्रह्ममीमांसाशास्त्रम् । सर्वाणि सूत्राणि युक्तिरूपाणि भवन्तीति निश्चप्रचम् । अनुमानमुद्रया इमानि विज्ञातुं शक्यन्ते । यथा 'आनन्दमयः' (आनन्दमयशब्दवाच्यः) विष्णुः, अभ्यासात् (ब्रह्मशब्दाभ्यासात्)' इति । इमानि सूत्राणि नारायणावतारभूतेन भगवता व्यासेन सर्वज्ञमुनिना प्रणीतानीत्यत्र न विवदन्ते केऽपि विदः । श्रीमदानन्दतीर्थभगवत्पादाचार्यैः सूत्रवाङ्मयमधिकृत्य चत्वांः प्रबन्धाः प्रणीताः । तत्रान्यतमं ब्रह्मसूत्रभाष्यम् । श्रुतिस्मृतिवचनोल्लेखनपुरःसरं सूत्रार्थवर्णनमिह कृतमिति ग्रन्थस्यास्य वैशिष्ट्यम्, नात्र परमतप्रक्रियानिरसनस्य विस्तरः । एकेन द्वाभ्यां वा वचनाभ्यां परमतनिरसनमिह विधीयते । अनुभाष्यं द्वितीयं भगवत्प्रणीतम् । एतदेवानुव्याख्यानमित्यपि गीयते । भाष्यमनुसृत्य प्रवृत्तः भगवत्पादीयग्रन्थान्तरगतयुक्तिसमुद्धरणात्मकः परकीयव्याख्याननिरसनचतुंश्चायं प्रबन्धः माध्व-वेदान्तेऽसाधारणं महत्त्वं भजते । ब्रह्मसूत्रानुव्याख्याने तु सर्वेषां मताचार्याणां प्रायः प्रतिसूत्रं विमर्शः कृतः । भगवत्पादाचार्योपसदः त्रिविक्रमपण्डिताचार्यः भाष्यस्य निरतिशयमाहात्म्यमेवम् उपवर्णयन् सहस्रार्थस्य भाष्यस्य 'तत्वप्रदीपः' इति । आचार्यपादचरितनिबन्धारः नारायणपण्डिताचार्याः भाष्यस्यास्य महिमानमेवं प्रतिपादयामासुः -

**बालसङ्घमपि बोधयद्भृशं दुर्निरूपवचनं च पण्डितैः ।**
**अप्रमेयहृदयं प्रसादवत् सौम्यकान्ति च विपक्षभीषणम् ।।**

**अस्तदूषणमवन्ध्यभाषणं लक्षितं सकललक्षणैः समम् ।**
**माननीयमपि नाकिनायकैः रूपमन्यदिव धन्यमात्मनः ।।** इति

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।** इति च

भाष्यलक्षणमत्रान्वर्थकमनुभूयते । भाष्यस्यास्य हार्दमाविष्कुर्वन्ती श्रीमज्जयतीर्थपूज्य-चरणप्रणीता प्रत्यधिकरणं पूर्वपक्ष-सिद्धान्तप्रज्ञापनचतुरा तत्त्वप्रकाशिका विराजतेतमाम् । अस्याः प्रकाशिकायाः समुद्र इव परमगभीरया आशयविशेषं प्रकाशयन्ती श्रीमद्व्यासतीर्थपूज्यचरणविरचिता चन्द्रिकाऽपि स्वमतानुगुण्येन सूत्रार्थसमर्थनदक्षा परकीयसूत्रार्थासमाञ्जस्यप्रदर्शनदीक्षा च विद्वज्जनैक-सुलभा च विराजते । ब्रह्मसूत्रभाष्यस्य महत्त्वम् अपूर्वत्वं च न्यायसुधाचन्द्रिकादिग्रन्थेषु तत्र तत्र सुष्ठूपवर्णितमस्ति । माध्वग्रन्थाध्ययनजिज्ञासूनां विदुषाम् अत्रत्यविचारप्रणालीं दिङ्मात्रमेव प्रदर्शयितुं भोक्त्रधिकरणं(भोक्त्रापत्तेरविभागः) इति कञ्चन सूत्रमधिकृत्य चन्द्रिकोक्तदिशा यथामति विवृणोमि।

**भोक्त्रापत्यधिकरणम्**

**ॐ अथातो ब्रह्मजिज्ञासा ॐ** इति प्रथमसूत्रम् । तत्र ब्रह्मणः जिज्ञासायाः कर्तव्यत्वं निरूपितम् । **ॐ जन्माद्यस्य यतः ॐ** इति द्वितीयं सूत्रम् । तत्र तावत्ब्रह्मणः सर्वकर्तृत्वमुक्तम् । परन्तु ब्रह्मणः सर्वकर्तृत्वे **परेऽव्यये सर्व एकीभवन्ति** इति अभेदश्रुतिः विरोधिनी भवति । श्रुतिः नाभेदपरा इति स्थापनेन श्रुतिसिद्धान्तविरोधोऽत्र प्रतिपाद्यते । इह ब्रह्मणो मुक्ताभेदमात्रे न पूर्वपक्षपर्यवसानम्,अपि तु अभेदयुक्त्या सर्वकर्तृत्वं नाङ्गीकारार्हमिति चिन्ताऽत्र क्रियते । मुक्तेश्वरयोः भेदसमर्थनेनेदमधिकरणं फलाध्यायसङ्गतमिति शङ्का तु फलत्वेऽपि युक्तिविरोधेऽन्तर्भावादत्रोक्तेति परिहरणीया ।

अयमत्राधिकरणसारः - विष्णोर्जगत्कारणत्वे युक्तिविरोधः परिह्रियते । **परेऽव्यये सर्व एकीभवन्ति** इति श्रुतिः मुक्तौ सर्वेषां जीवानां ब्रह्मणा सह अभेदमभिदधाति । यतः तयोर्मुक्तावभेदस्तत एव पूर्वमपि अभेदो विद्यत इत्यनुसन्धेयम् । तत्र युक्तिः (न हि संसारे अन्यस्य = ब्रह्मणः अन्यस्य = जीवस्य मुक्तौ अन्यत्वं = ब्रह्मत्वं युज्यते) । एवं पूर्वपक्षिते भगवानाह सूत्रकारः - **भोक्त्रापत्तेरविभागोत् स्याल्लोकवत्** इति । सूत्रार्थः - **भोक्तुः** = जीवस्य मोक्षे, **आपत्तेः** = ब्रह्मत्वापत्तेः, परेऽव्यये सर्व एकीभवन्ति इत्यादिषु श्रवणात्, **तयोः** = जीवब्रह्मणोः, **अविभागः** = भेदाभावः इति चेत्, न । यतः स्याल्लोकवत्, जले जलान्तंस्य एकीभावोक्तिवत् भेदेऽपि स्थानैक्याद्यालम्बनेन ऐक्योक्तिरुपचरिता स्यात् । अयमभिप्रायः -

यथा लोके उदके उदकान्तरसेचने मिश्रं भवति उदकं तद्वत् । नात्रोभयोरभेदः सम्भावयितुमपि (दृश्यते) शक्यते, वृद्धेर्दर्शनात् । एवञ्च जीवोऽपि मुक्तौ परमात्मना सम्मिलितो भवति नाभिन्नः । तादृगेव भवति इति श्रुतिः तत्सादृश्यमेव प्रतिपादयति नाभेदमिति निश्चप्रचम् ।

अत्र भाष्ये तावत् भगवत्पादाचार्यैः 'न ह्यन्यस्य ह्यन्यत्वं युज्यते' इति युक्तिः पूर्वपक्षस्थापकतया उदाहृता । परम् अनुव्याख्याने तु 'नान्यदन्यत्वमापन्नं क्वचित् दृष्टं कथञ्चन' इति इह भिन्नमुत्तरत्र नाभेदमापन्नं दृश्यते इत्यभेदनिरासपरतया सिद्धान्तस्थापकतया व्याख्याता । एकैव युक्तिः पूर्वपक्षस्थापिका सिद्धान्तस्थापिका च कथं सम्भवति इति तु महान् प्रश्नः समुन्मिषति । तादृशविरोधं चन्द्रिकाचार्याः तात्पर्यचन्द्रिकायां परिहृतवन्तः । तात्पर्यचन्द्रिकायां तु एवं विरोधपरिहारक्रमः दरीदृश्यते । अत्र त्रयः पूर्वपक्षाः सम्भवन्ति । एकीभवन्ति इति श्रुत्या ब्रह्मणस्तावन्मुक्तावभेदः प्रतीयते । न च तावतैव ब्रह्मणः सर्वकर्तृत्वं प्रतिषिद्धं भवति । संसारिण इव मुक्तस्य सर्वकर्तृत्वं प्रतिषिद्धं भवति । संसारिणः सर्वकर्तृत्वे विरोध इव मुक्तस्य सर्वकर्तृत्वे प्रत्यक्षादिविरोधाभावात् पूर्वमसतो मोक्षस्य ज्ञानेनोदय इव पूर्वमसतोऽपि सर्वकर्तृत्वस्य मुक्तौ सम्भवात् । ततश्च जीवाभिन्नस्य ब्रह्मणः सर्वकर्तृत्वं न भवतीति वक्तुं शक्यते ।

असर्वकर्तृत्वेन योऽयं संसारी प्रसिद्धः तदभिन्नत्वात् ब्रह्मणोऽपि न सर्वकर्तृत्वमुपपद्यते । न च श्रुतिः मुक्तजीवस्यैव ब्रह्मभावमभिदधातीति वाच्यम् । 'न ह्यन्यस्यान्यत्वं युज्यते' इति न्यायेन अन्यस्य = संसारे भिन्नस्य मुक्तौ अन्यत्वं ब्रह्मभावः न युज्यते । न हि क्वापि घटः कालान्तरे पटो भवति । अतः मुक्तौ जीवः परमात्माभिन्नः तर्हि संसारेऽपि तथा । तथा च संसारिण असर्वकर्तृत्वं प्रत्यक्षसिद्धम् । तदभिन्नस्य ब्रह्मणोऽपि तथेति न विष्णोः सर्वकर्तृत्वं युक्तमिति ।

अस्मिन् पक्षे 'एकीभवन्ति' इत्यत्र अभूततद्भावार्थकच्विप्रत्ययः कथं सङ्गच्छते । प्रतीत्यपेक्षया तदुपपत्तेः । प्राग्विभिन्नतया दृष्टोऽयं जीवः मुक्तौ अभिन्नतया दृश्यत इति एकीभवन्ति इत्युच्यते । एवञ्च मुक्तावभेदेन पूर्वमप्यभेदं प्रसाधयितुं न ह्यन्यस्य अन्यत्वं युज्यते

(मुक्तावभेदेन पूर्वमपि अभेदं प्रसाधयितुम्) इति पूर्वपक्षभाष्यम् प्रवृत्तम् ।

२) च्विप्रत्ययस्वारस्यात् पूर्वं भेदः मुक्तौ त्वभेदः इति द्वितीयः पक्षः । 'न ह्यन्यस्य' इति युक्तिस्तु च्विप्रत्ययश्रुतिबाधिता । एवञ्च जीवब्रह्मणोरभेदात् न ब्रह्मणः वास्तवं जगत्कारणत्वं युक्तम् इति द्वितीयः पक्षः ।

एतत्पक्षनिरासाय पूर्वं भेदस्य सिद्धत्वेन मुक्तावपि स एवाङ्गीकार्य इति साधयितुं 'नान्यदन्यत्वमापन्नं क्वचिद् दृष्टं कथञ्चन' इति अनुव्याख्यानं प्रवृत्तम् । यतो लोके अन्यत् वस्तु अन्यत्वं वस्त्वन्तरणाभेदमापन्नं क्वचित् न दृष्टम् । अतः तद्दृष्टान्तेन जीवस्य मुक्तावपि न ब्रह्मभावो भवतीति ।

३) तृतीयस्तु - पूर्वं भेदाभेदौ मुक्तौ तु केवलाभेदः । एवञ्च च्विप्रत्ययो युक्तः । इदानीं च्विप्रत्ययस्य अर्थसङ्कोचो नास्त्येव । पूर्वं केवलाभेदाभावात् । 'न ह्यन्यस्य' इति युक्तिविरोधोऽपि न । पूर्वमप्यभेदस्य सत्त्वात् । एतं वा पक्षमाश्रित्य भाष्यानुव्याख्याने प्रवृत्ते । तत्र भाष्ये च्विप्रत्ययेन पूर्वं भेदस्य सिद्धत्वात् पूर्वपक्षानुपयुक्तत्वाच्च अभेद एव साधितः । अनुव्याख्यानेऽपि पूर्वं भिन्नाभिन्नस्यापि पश्चात् केवलाभेदो नास्तीति भावेन 'नान्यदन्यत्वम्' इत्युक्तम् । उक्तं पक्षत्रयमपि मुक्तावभेदसापेक्षम् । स एवासिद्धः, **एकीभवन्ति** इति श्रुतेः भाष्ये यथोदकं तूदके सिक्तम् इति श्रुत्यन्तरादिविरोधोक्तेः ।

न्यायविवरणे **निरञ्जनः परमं साम्यम्** इति पूर्ववाक्यविरोधस्य परात्परं पुरुषमुपैति इति उत्तरवाक्यस्य च विरोधोक्तेः । परमसाम्यम् अभेदविरोधीति स्फुटम् । एवं पुरुषमुपैति इति परमपुरुषमिलनमपि अभेदविरोध्येव ।

अभेदपरत्वे 'परेण' 'अव्ययेन' इति तृतीया स्यात् न तु सप्तमी । सायं गोष्ठे गाव एकीभवन्ति' इत्यादाविव एकस्थानस्थितत्वनिमित्तेन ऐक्यव्यपदेशोपपत्तेः । 'कर्माणि विज्ञानमयश्च आत्मा' इत्यत्र कर्मणां ब्रह्मैक्यस्य बाधितत्वात् अभेदप्रतिपादनम् अयुक्तम् ।

रथ्याजलं गङ्गाजलेनैक्यमापन्नम्','गोष्ठे गाव एकीभूताः', स्थलद्वयेऽपि स्थानैक्यपरा, एकीभूता सेना इत्यत्र मत्यैक्यपरा । एवं एकीभवन्ति इत्यत्रापि ऐक्यवाक् भेदाविरोधिनी ।

तदुक्तम्-

**रथ्याजलं विष्णुपदीजलेनैकत्वमागतम् ।**
**इतस्ततो गता गावः सायमेकत्वमागताः ।।**

**एकीभूता तु सा सेना पाण्डवानभ्यवर्तत ।**
**इत्यादिवत् भवेदेकीभवन्तीत्यादिवेदवाक् ।।** इति ।

न च जलस्य जलान्तरमेलनेनैक्यं क्वापि दृष्टम् । उक्तश्च न्यायामृते -'माशराशौ प्रक्षिप्त-माषतदवयवानामिव क्षीरे प्रक्षिप्तनीरतदवयवानामिव चान्योन्यं मिश्रभावोऽपि प्राग्भिन्नानां पश्चादप्यैक्यायोगात्' इति ।

अपि च **ता एवापो ददौ तस्य स मुनिः संश्रितव्रत** इत्यस्ति ऐतिह्यम् । अत्र एवं कथा श्रूयते - इन्द्रः सजले वसिष्ठकमण्डलौ स्वकमण्डलुजलम् उत्तरत्र परीक्षार्थं स्थापयित्वा सुदासस्य राज्ञो यज्ञं प्रति गत्वा पुनरागत्य वसिष्ठं प्रति परीक्षार्थं स्वजलं ययाचे । वसिष्ठः तज्ज्ञात्वा ता एवाप इन्द्राय ददौ । अनेनापि उदकस्योदकान्तरमेलनेन ऐक्यं न दृश्यते इति ज्ञायते । न्यायामृते उदा- हरणान्तरमपि प्रदर्शितम् । **कृष्णवेणी तुङ्गभद्रा भीमरथी मलापहा भवनाशिनी** इति सप्तनदीनां निवृत्तिसङ्गमे मिश्रीभूय उत्तरत्र गतानां पुनः विभज्य प्रत्येकं प्रत्येकं समुद्रगमनदर्शनात् इति ।

न्यायामृततरङ्गिण्याम् - गङ्गायमुनयोः प्रयागे सङ्गत्य प्राचीं गतयोः पुनर्विभक्तयोरियं गङ्गा इयं यमुनेति गौडदेशे जनैर्व्यवह्रियमाणयोः सर्वसिद्धत्वात् । समुद्रेऽपि नदीसङ्गमस्थले अल्पा वृद्धिः दृश्यते इति समुद्रतीरवासिनां प्रवादः अस्ति इति उक्तमस्ति ।

अपि च उदकस्य उदकान्तरैक्ये 'यथोदके शुद्धे शुद्धमासिक्तं तादृगेव भवति' इति भाष्योक्त सावधारणश्रुतिविरोधः स्यात् । यतो वृद्धिः प्रदृश्यते इति सयुक्तिकस्मृतिविरोधोऽपि स्यात् । अतः नाभेदः वक्तुं शक्यते । उक्तश्च न्यायामृते -

**यथा पक्षी च सूत्रं च नानावृक्षरसा यथा ।**

**यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा ।।**

**यथा स्तेनापहार्यौ च यथा पुंविषयावपि ।**
**तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ।।**

**मानभेदात् स्पर्शरसपूर्वभेदाच्च नीरयोः ।**
**मेलनेऽप्यभिदा नास्ति यथैव क्षीरनीरयोः ।।** इति ।

प्रत्यक्षानुभवाच्च भेद एव सिद्धः । अन्यथा इत्युक्तेः ।

हंसेन विविच्यमानयोः क्षीरनीरयोरभेदः स्यात् । अपि च द्रुतसुवर्णताम्रयोर्मेलनेनाभेदे तत्कार्यं पणादौ केवलस्वर्णादिकार्यपणान् मूल्यादिभेदा न स्यात् । अपि च नदीपाथःपरमाणूनां समुद्रपाथः परमाणुभ्यः पूर्वावस्थितेभ्यो भेद एव नाभेद इति भामत्युक्तनदीसमुद्राभेदः निरस्तः । तदुक्तं व्यासतीर्थैः-

**माषादिवच्च राश्यादौ सभादौ ब्राह्मणादिवत् ।**
**जले जलान्तरस्यापि संश्लेषो न त्वभिन्नता ।। इति ।**

अत एव भाष्ये तादृगेव भवति इत्युक्तम् । यदि अभेदाभिप्रायः तर्हि तदेव इति स्यात् । तस्मात् नदीसमुद्रादिदृष्टान्तानुगुण्येन जीवेशयोर्भेद एव, न तु कदापि अभेदः ।

तदेवं जीवेश्वरयोरभेदविषये चन्द्रिकायां न्यायामृते च भाष्ये च यदुक्तम् तत् मया यथामति निरूपितम् । भ्रान्तेश्चेतनधर्मत्वात् दोषा भवेयुः । हंसक्षीरन्यायेन सज्जनाः विद्वज्जनाः दोषान् विहाय गुणान् गृह्णन्तु इति प्रार्थये ।।

★★★★

# प्रवाहतोऽनादित्वविचारः

- डा.सञ्जीवाचार्यः देशपाण्डे

अध्यापकः, पूर्णप्रज्ञविद्यापीठम्

(प्र) उपाधिखण्डन 'मङ्गल' टीकाटिप्पण्यां मन्दारमञ्जर्यां प्रवाहतोऽनादित्वं नाम 'एकप्रवाहमध्यपतितानेकप्रवाहिप्रतियोगिकप्रागभावावच्छिन्नकालावृत्तित्वानधिकरणध्वंसप्रतियोगिप्रवाहित्वम्' इत्युक्तम् । अस्य समन्वयश्चेत्थम्?

(उ) एकप्रवाहः= कामप्रवाहः, तत्तत्परकालद्वयवृत्तिजगत्प्रवाहो वा तन्मध्यपतिता अनेकप्रवाहिणोऽनेककामास्तेषां ये प्रागभावास्तत्कालस्तादृशकालवृत्तिः (अवृत्तित्वानधिकरणत्वं नाम वृत्तित्वमेव) यो ध्वंसस्तत्प्रतियोगी यः प्रवाही, तत्वम् । प्रधट्टार्थः - सर्वस्मिन् क्षणे एककामप्रागभावः,अपरकामध्वंसो विद्यते । न त्वेकस्य कामस्य सर्वकालवृत्तित्वम् । एतादृशः कामः प्रवाहतोऽनादिरित्युच्यते ।

**दलकृत्यविचारः-**

ध्वंसप्रतियोगिप्रवाहित्वं प्रवाहतोऽनादित्वम् इत्येवोक्तौ सादिप्रवाहात्मकप्रवाहिण्यतिव्याप्तिः। अत एकप्रवाहमध्यपतितानेकप्रवाहिप्रागभावावच्छिन्नकालवृत्तित्वं ध्वंसविशेषणं वक्तव्यम् । सादिप्रवाहाख्यप्रथमप्रवाहिप्रागभावकाले 'प्रवाही ध्वस्त' इति प्रमा न भवति । द्वितीयप्रवाहिप्रागभावकाले तु (प्रथम) प्रवाही ध्वस्तः' इति प्रमा भवति । तस्मान्न दोषः ।

ध्वंसपदेन पूर्वकल्पवृत्तिजगतो ध्वंसग्रहणे ऽनेकप्रागभावावच्छिन्न कालेष्वन्यतमे पूर्वकल्पे वृत्तित्वं तस्य नास्तीत्यव्याप्तिपरिहाराय 'कालावृत्तित्वानधिकरणत्वम्' ध्वंसे विशेषणीयम् । प्राग....(सर्व) कालेष्ववृत्तित्वानधिकरणत्वं तु तद्ध्वंसेऽस्ति, तस्य एतत्कल्पे सत्वाद् इत्यव्याप्तिपरिहारः।

स्वप्रागभावकालवृत्तित्वं स्वध्वंसस्य नास्तीत्यसम्भववारणायानेके-(स्वभिन्न)-ति ।

एकप्रवाहशब्देन सादिप्रवाहो व्यावर्त्यतेऽतो सादिप्रवाहो वा तत्सदृशो वा घटप्रवाहो नैकप्रवाहशब्देन ग्राह्यः, यतो हि, घटप्रवाहशब्दार्थो बुद्धिं नारोहति, पुत्रप्रवाह इव घटप्रवाहः स्यादपि, तथाऽपि घटप्रवाहस्य नानादित्वं (एकत्वम्) कस्यचित्प्रवाहिणोऽनादित्वस्य प्रवाहानादित्व-प्रयोजकस्यात्राभावात्, न च वाच्यं, प्रवाहिणो जगतोऽनादित्वे तदन्तर्गतस्य घटस्य कथं नानादित्वमिति, अनादिनित्यजीवान्तर्गतद्वित्वादीनामिव आदिनिधनवत्वस्येवोपपत्तेः,

ननु 'धाता यथा पूर्वमकल्पयत्' इति श्रुत्या घटस्य प्रवाहतोऽनादित्वमिति चेन्न, तथा सति प्रवाहिजगतोऽनादित्वे तदन्तर्गतस्य सर्वस्याप्यनादित्वमिति पूर्वकल्पेऽनादिजगदासीत् तत्सदृशम् 'अनादिजगद् असृजत्' इति विरुद्धार्थः श्रुत्या प्रतीयेत, अतः पूर्वब्रह्मसृष्टजगदन्तर्ग तसदृशम् असृजद्, इति वक्तव्यम् । अतः 'एकप्रवाह' शब्देन कामप्रवाहो ग्राह्यः ।

अत्र 'अनेक' शब्दस्य 'स्वभिन्न' इत्यर्थो निरूपितस्तल्लाभश्चेत्थम्-

'एकशब्दो मुख्यार्थकः, लक्ष्यावधारणाय लक्षणं प्रवर्तत इति लक्षणस्य लक्ष्यं मुख्यमिति अनेकशब्दः स्व(लक्ष्य)-भिन्नार्थक इति ।

तर्हि 'स्वभिन्न' इत्येव वक्तव्यम्, किमिति 'अनेक'पदं प्रयुक्तम्? इति चेद्, 'एक(केवल)भिन्न' इत्यप्यर्थलाभायेति ग्राह्यम्, अनेन च विच्छिद्यमानप्रवाहस्यान्तिमौ यावल्लक्ष्यभूतौ प्रवाहिणौ, तयोर्लक्षणं नातिव्याप्नोतीति भावः ।

कार्योन्मुखस्य अपरोक्षज्ञानप्रतिबन्धकीभूतस्य कामादेर्लक्ष्यत्वमिति 'अनाद्यविद्याकामकर्म-निमित्तोऽयम्.....' इत्यादि टीकया 'द्रव्यं कर्म.....' इत्यत्रत्यसुधाव्याख्यानैरपि सूच्यते ।

तथा च, अन्तिमप्रवाहिणः कार्योन्मुखत्वाभावाद् अलक्ष्यत्वम् । ततः प्राक्तनश्च अपरोक्ष-दातुर्हरेरिच्छया प्रतिबन्धकत्वशून्योऽत एव तदुत्तरक्षणोत्पन्नापरोक्षेण, प्रवाहसहितो नश्यतीत्यलक्ष्यमेवेति धिया 'अनेकत्व'विशेषणं निविष्टं व्यासतीर्थश्रीमच्चरणैः ।।

★★★

# उपक्रमादुपसंहारः प्रबलः

- गुरुराजाचार्यः कल्कूरः
प्राध्यापकः, पूर्णप्रज्ञविद्यापीठम्

उपक्रमोपसंहारयोः यत्र विरुद्धता भाति तत्र मीमांसकैः पूर्वतन्त्रे प्राप्ताप्राप्तबाधविवेकाय श्रुत्यादिभिः लिङ्गादीनां प्रत्यक्षेण इत रेषामुपक्रमेण उपसंहारस्य बाध इत्यङ्गीकारात् उपसंहारापेक्षया उपक्रमः प्रबल इति केचित् कथयन्ति । भगवत्पादा अनुव्याख्याने-

**उपक्रमादिलिङ्गानां बलीयो ह्युत्तरोत्तरम् ।**
**श्रुत्यादौ पूर्वपूर्वं तु ब्रह्मतर्कविनिर्णयात् ।।**

इत्यभिधानात्, 'उपक्रमादुपसंहारः प्रबलः व्याख्यानस्य पश्चात्तनत्वनियमात्' इति न्यायविवरणे उपसंहारप्राबल्योक्तेः उपक्रमात् उपसंहार एव बलीयान् इति मन्यन्ते ।

उपक्रमप्राबल्यवादिनाम् आशय एवं वर्तते- सर्वस्य शब्दस्य स्वार्थलङ्घने विरोधः कारणम् । उपक्रमदशायाम् उपसंहारः विरोधी न ज्ञातः । उपक्रमः मुख्यवृत्तिरेव युक्तः । उपसंहारोऽपि मुख्यवृत्तिः चेत् न तेन सम्बध्यते । अत उपक्रमोपसंहारयोः एकवाक्यत्वानुपपत्तिप्रतिसन्धानस्य परिहारः उपसंहारस्य उपक्रमानुसारेणैव लक्षणां विना कर्तुम् अशक्यम् । अतः उपक्रमविरोधेन उपसंहारवाक्यात् शाब्दबोधः न जायते इति मीमांसकानां सिद्धान्तः ।

अत्र व्यासतीर्थाः तर्कताण्डवाख्ये ग्रन्थे उपक्रमात् उपसंहारः बलीयान् । उपसंहारस्य उपक्रम व्याख्यानरूपत्वात् । व्याख्येयव्याख्यानयोः क्रमेण प्राथम्यपश्चात्तनत्वनियमः अविप्रतिपन्नः। लोके 'गाम् आनय' 'बलीवर्दम् आनय' इत्यत्र सामान्यवाचकस्य व्याख्येयगोशब्दस्य व्याख्यानरूपेण चरमोपस्थितेन बलीवर्दशब्देन सन्दिग्धार्थस्य गोशब्दस्य अर्थनिर्णयः दरीदृश्यते ।

एवं वेदेऽपि 'वासः परिधत्ते यत् क्षौमम्' इत्यपि दृश्यते । व्याख्यानतो विशेष-

प्रतिपत्तिः इति प्रसिद्धिरपि वर्तते । अत्र अप्पय्यदीक्षितेन्द्रा उपक्रमपराक्रमाख्ये ग्रन्थे पूर्वोक्तेऽर्थे आक्षिपन्ति।

सर्वत्र उपसंहारस्य व्याख्यानरूपत्वं प्रतीकधारणादिज्ञापकं विना अप्रतीतेः इदं व्याख्यानं इति पदमुपादाय कल्पनीयं स्यात् । व्याख्यानव्याख्येयोः पौर्वापर्ये नियमाभावात् उपसंहारस्य व्याख्यानरूपत्वं कल्पयितुमपि अशक्यम् ।

व्याख्यानस्य पाश्चात्यत्वनियमोऽसिद्धः । व्याकरणे 'वृद्धिरादैच्' इत्यादेः प्रथमश्रुतस्य 'सिचि वृद्धिः' इत्यादि चरमश्रुतसूत्रस्य वृद्ध्यादिपदव्याख्यानरूपत्वदर्शनात् । वेदे 'यतो वा इमानि भूतानि जायन्ते' इति प्रथमोपस्थितस्य शब्दस्य चरमोपस्थितब्रह्मशब्दव्याख्यानरूपत्वदर्शनात् परस्परविरोधस्थले प्रमाणावगतैकवाक्यत्वनिर्वाहार्थं परस्यैव पूर्वव्याख्यानरूपत्वकल्पनम् अप्रामाणिकम् इति उपसंहारप्राबल्ये व्याख्यानरूपत्वं न कारणम् इति वदन्ति ।

अस्याक्षेपस्य समाधानं श्रीविजयीन्द्रस्वामिभिः उपसंहारविजयाख्ये ग्रन्थे एवं विधास्यते । तथाहि- व्याख्येयोपस्थितिं विना व्याख्यानप्रवृत्तिः एव न भवति । उपक्रमोपसंहारयोः यत्र विरोधः अवगतः तत्र प्रतीतैकवाक्यत्वनिर्वाहाय अन्यतरस्य व्याख्यानरूपत्वाश्रयणेनापि सम्भवति । अतः यत्प्रथमोपस्थितं तदेव व्याख्येयं यच्चरमोपस्थितं तदेव व्याख्यानमिति नियमः स्वीकर्तव्यः। अस्य नियमस्य ब्रह्मवृद्ध्यादिशब्दस्थले व्यभिचारः प्रदर्शित इति चेत् न लोके व्याख्येय- पदोपस्थितिं विना व्याख्यानरूपशब्दविशेषस्य कर्तव्यत्वेन उपस्थितिः नास्ति । अतः व्याख्येय- ब्रह्मवृद्ध्यादिशब्दोपस्थितेः पाठक्रमानुसारेण अप्राथम्येऽपि अर्थक्रमानुसारेण प्रामाण्यम् अस्ति इति कल्पनीयम् । अतः उपसंहारस्य व्याख्यानरूपत्वम् अप्रामाणिकं न भवत्येव तत् उपक्रमाद् उपसंहारस्य प्राबल्ये कारणम् इति ।।

★★★

# एकार्थीभावः

- गुरुराजाचार्यः कुलकर्णी
व्याकारणाध्यापकः, पूर्णप्रज्ञविद्यापीठम्

**'समर्थः पदविधिः'** इति सूत्रे समासादिवृत्तयः सामर्थ्ये सत्येव भवन्ति इति निगद्यते। तत्र च सामर्थ्यं नाम एकार्थीभावः । 'संसृष्टार्थः समर्थः' इति भाष्योक्तेः । एकार्थीभावो नाम यत्किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैकैकशक्त्या एकोपस्थितिजनकत्वम् ।

**पृथगर्थानां एकार्थीभावः सामर्थ्यम्** । इदश्च सामर्थ्यं राजपुरुषः इत्यादि वृत्तावेव । यत्किञ्चित्पदं नाम राज्ञः इति, पुरुषः इति पदम् । तत्पदजन्या या पृथक् उपस्थितिः नाम राज्ञः पुरुषस्य च उपस्थितिः । तद्विषयाः ये अर्थाः राजादयः अर्थाः । तदर्थकत्वेन लोके दृष्टाः शब्दाः नाम राज्ञः पुरुषः इत्यादिशब्दाः । तेषां विशिष्टविषयैकशक्त्या राजसम्बन्धीपुरुषः इत्यादि एकोपस्थितिजनकत्वं वृत्तावस्ति ।

अयं भावः- 'राज्ञः पुरुषः' इत्यादिवाक्ये यथा राज्ञः पुरुष इत्यादिपदैः राज्ञः पुरुषस्य च पृथक् बोधे सति आकाङ्क्षामूलकवाक्यशक्तिवशात् विशेषण विशेष्य भावपन्नविशिष्टार्थप्रतीतिः नैवं वृत्तौ । किन्तु अवयवशक्तिसहकृतसमुदायशक्त्या विशेष्यविशेषणभावापन्नविशिष्टार्थ-प्रतिपत्तिः भवति ।

घटेन पटेन इत्यादिपदानां एकत्वेन तत्स्थप्रकृतिप्रत्ययादिभिः पार्थक्येन अर्थस्य अनुपस्थितेः, विशिष्टविषयैकैकशक्त्या एकोपस्थितिजनकत्वस्य सत्वात् अतिव्याप्तिः । अतः यत्किञ्चिद्दृष्टानामित्युक्तम् । तेन च लोके प्रकृतिप्रत्यययोः पार्थक्येन अर्थोपस्थिति जनकत्वाभावात् न दोषः । औपगव इत्यादौ अणादिप्रत्ययानां पृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टत्वाभावात् अतिव्याप्तिः । तद्वारणाय यत्किञ्चित् पदजन्य इत्युक्तम् । उपगोः अपत्यमित्यादिवाक्ये

अपत्यपदजन्य पृथगुपस्थितिविषयार्थकत्वेन दृष्टत्वसत्वान्न दोषः ।

विशिष्टविषयकैकशक्त्या इति कथनेन एकार्थीभावविशिष्टशक्योः हेतुहेतुमद्भावः एव सूच्यते। अत एव कैयटेन **'अन्य एव अवयवार्थान्वितस्समुदायार्थः प्रादुर्भवतीति तदपेक्षया एकार्थीभावः उच्यते । पांसूदकवदविभागापन्नत्वात्'** इति निगद्यते ।

एकार्थीभावफलं च निष्कौशाम्बि, गोरथः, घृतघटः, गुडधानाः, केशचूडः, सप्तपर्णः, गौरखरः, इत्यादिषु क्रान्तयुक्तपूर्णमिश्रसंघातविकारसुच्प्रत्ययलोपवीप्साजातिविशेषाभिधानम् इति कैयटः प्रणिजगाद । परन्तु नैतच्चकास्ति । भाष्ये ईदृशप्रयोजनस्य अनभिधानात् ।

अपि च निरादीनां पूर्वपदानां क्रान्ताद्यर्थवृत्तित्वात् पुनस्तदर्थे क्रान्तादिशब्दाप्रयोगस्य 'उक्तार्थानामप्रयोगः' इति न्यायेनैव सिद्धत्वात् । 'गौरखर' इत्यादिस्थले तु कृकलासरूपजातिविशेषाभिधानस्य च रूढ्या एव लाभात् ।

अपिच 'संख्ययाऽव्ययासन्नादूराधिकसंख्याःसंख्येये' इति सूत्रे द्विदशा इत्यादौ समासेन सुजर्थः अभिहितः इति समासे सुज् न भविष्यति इति भाष्यकारैः कथ्यते । अनेनापि कैयटमतस्य असाधुत्वं गम्यते। भूषणकारादयस्तु वृत्तौ उपसर्जनपदार्थे विशेषणानन्वयः एकार्थीभावस्य फलम् इति अभ्यधुः। नैतच्चमच्चरीकरीति । एकार्थीभावसत्वेऽपि देवदत्तस्य गुरुकुलमित्यादौ विशेषणान्वयसत्वात् । घटः इत्यादौ एकार्थीभावस्य अभावेऽपि तदेकदेशे विशेषणान्वयाभावात् ।

नागेशभट्टमहोदयास्तु विशेषणस्य विशेष्यान्तरसम्बन्धाभावः, एवं विशेष्यस्य विशेषणान्तरसम्बन्धाभावः फलमिति सञ्जगदुः । अत एव 'राज्ञः पुरुषः अश्वश्च' इतिवत् 'राजपुरुषः अश्वश्च' इति न प्रयोगः क्रियते ।

एकत्र विशेषणत्वेन गृहीतशक्तिकस्य ज्ञातस्य वा परत्र विशेषणत्वायोगात् । राज्ञः पुरुषः भार्यायाश्च इतिवत् राजपुरुषः भार्यायाश्च इति न प्रयुज्यते । एकविशेषणवैशिष्ट्येन गृहीतशक्तिके ज्ञाते वा विशेष्ये तत्सजातीयसम्बन्धेन विशेषणान्तरसम्बन्धस्याव्युत्पत्तेः ।

एवं वृत्तौ उपसर्जनपदार्थे संख्या बोधकप्रातिपदिकाभावे एकत्वादिरूपसंख्याविशेषानवगतिरपि फलत्वेन उररीक्रियते । अपि च घटपटौ इत्यादि द्वन्द्वे चकाराद्यप्रयोगोऽपि फलम् । अयं च एकार्थीभावः क्लृप्तावयवशक्तिसहकृतः समुदायशक्त्या साध्यते । ईदृशश्च एकार्थीभावः समर्थः चार्थे अन्यपदार्थे इत्याद्यनुवादबलात् अलौकिके विग्रहवाक्ये कल्प्यते । यथा शतृप्रत्ययादौ विद्यमानद्वितीयान्तसामानाधिकरण्यं लकारे कल्प्यते, एवम् अत्रापि ।

★★★

# धनुर्मासः

- श्रीनिवासः गुरुभीमः जोषी

अध्यापकः, गुरुसार्वभौमविद्यापीठम्

द्वादशमासानां मध्ये मार्गशीर्षमासोऽप्येकः । श्रीकृष्णः भगवद्गीतायां दशमेऽध्याये वदति- **'मासानां मार्गशीर्षोऽहम्'** इति । एतादृशविशिष्टमार्गशीर्षमासे धनुर्मास आगच्छति । तस्मिन् विषये लेखनमुखेन किञ्चित् भणितुमुत्सहे ।।

सूर्ये धनूराशौ स्थिते धनुर्मासः भवति । अस्मिन् काले महाशैत्यं वर्तते । केचित्तु मासोऽयं सर्वान् धनुराकारेण स्वदेहम् आनमय्य शेतुं प्रेरयति, तस्मात् धनुर्मासः इति वदन्ति । शैत्येन देहालस्यम् अस्मान् आच्छादयति । ततः ऋषिमुनयः कांश्चन नियमान् उपदिशन्ति । तेषां मध्ये अरुणोदयसमये देवपूजनं तथा मुद्गान्ननैवेद्यं प्रमुखम् ।।

धनुर्मासः देवानाम् उषःकालः । सूर्ये मकरराशिं प्रति गच्छति सति उत्तरायणं भवति । तदा देवानामुषःकालः । तस्मात् धनुर्मासे उषःकाले अरुणोदयसमये देवपूजा कर्तव्या। तथैव लक्ष्मीस्तोत्रं द्वादशवारं पठनीयम् । धनुर्मासविषये कृष्णाचार्यकृतस्मृतिमुक्तावल्याम्-

**धनुर्मासे हरिः प्रीतः उषःकालार्चने ध्रुवम् ।**
**ददात्यभीष्टमक्षय्यं सत्यमेव ब्रवीमि ते ।।**

**समभ्यर्च्य च मुद्गान्नं दध्ना सह निवेदय ।**
**भोजय द्विजवर्यांश्च प्रातःकाले यथाबलम् ।।**

**निवेदयित्वा हरये ब्राह्मणान् भोजयेत्सुधीः ।**
**यं यं कामयते कामं तं तं प्राप्य सुदुर्लभम् ।।**
**स स्याद्योगी सुधीः श्रीमान् वैष्णवो जन्मजन्मनि** ।।इत्युक्तम्

यः धनुर्मासे उषःकाले हरिम् अर्चयति तस्मै प्रीतः भगवान् सर्वाण्यभीष्टानि ददाति । धनुर्मासे उषःकाले मुद्गान्नं दध्ना सह निवेदयित्वा प्रातःकाले एव द्विजान् यः भोजयति सः सर्वान्

कामान् प्राप्नोति । इति श्लोकानां भावार्थः ।।

**धनुर्मासपूजाकरणे फलान्तरम् उक्तम् -**

**कोदण्डस्थे सवितरि मुद्गान्नं यो निवेदयेत् ।**
**सहस्रवार्षिकी पूजा दिनेनैकेन सिद्ध्यति ।।**

यः प्रातः मुद्गान्नं कृत्वा धनुर्मासे हरये निवेदयति सः सहस्रदिनपूजाकरणे यत्फलं भवति तत्फलम् एकस्मिन् दिवसे धनुर्मासपूजाकरणेन प्राप्नोति ।।

**अकरणे च दुष्फलमुक्तम्-**

**उषःपूजां धनुर्मासे यो न कुर्वीत वैष्णवीम् ।**
**सप्तजन्मसु रिक्तः स्यात् क्षयरोगी च मूढधीः ।।** इति ।।

यः धनुर्मासे उषःकालपूजां न करोति सः क्षयरोगी, मतिहीनश्च भवति । कस्मिन् समये पूजा कर्तव्या इति विषये विष्णुशचीसंवादः श्लोकरूपेण वर्तते-

**धनुर्मासे कृता पूजा मध्याह्ने निष्फला भवेत् ।**
**मुख्यारुणोदये पूजा मध्यमा लुप्ततारका ।।**

या धनुर्मासे अरुणोदये पूजा क्रियते सा उत्तमा । नक्षत्राणि लुप्ते सति कृता पूजा मध्यमा । मध्याह्ने कृता पूजा निष्फला भवति । इत्यादि ।

**मुद्गान्नं कथं कार्यमिति विषये-**

**मुद्गं तण्डुलमानं स्यादुत्तमोत्तममुच्यते ।**
**मध्यमं तण्डुलादर्धं तदर्धमधमं भवेत् ।।**

**मुद्गं हि द्विगुणं केचित् प्रशंसन्ति मुनीश्वराः।**
**यथाबलं प्रकुर्वीत न ह्रीयेत्तण्डुलार्धतः ।।**

तण्डुलसमानप्रमाणं मुद्गं वर्तते चेत् तदा उत्तमोत्तमं फलम् । तण्डुलार्धप्रमाणं मुद्गं यदि स्यात् तदा मध्यमं फलम् । तण्डुलार्धादर्धं मुद्गं यदि स्यात् तदा अधमफलम् । तण्डुलापेक्षया द्विगुणं मुद्गं चेत् तत् श्लाघनीयम् । किन्तु तण्डुलार्धप्रमाणापेक्षया न्यूनं मुद्गं न भवेत् ।

**यदि मुद्गान्नं धनुर्मासे न निवेदयति तदा प्रत्यवाय उक्तः-**

**यस्तु दारिद्र्यदुर्बुध्या मुद्गान्नं न निवेदयेत् ।**
**विष्णवे कार्मुके प्रातः सप्तजन्मसु निर्धनः ।।**

यदि नरः कुत्सितबुद्ध्या उषःकाले धनुर्मासे मुद्गान्नं न निवेदयति सः सप्तजन्मसु धनरहितः भवति इति श्लोकस्यार्थः ।। एतादृशधनुर्मासविषये आदित्यपुराणे, पञ्चरात्रे, पारमेष्ठ्ये अनेके च ग्रन्थे निरूपणं कृतम् । तादृशधनुर्मासाचारणे मार्गशीर्षनियामकौ श्री-केशवौ अस्मभ्यं शक्तिं प्रदत्ताम् ।

# श्रीराघवेन्द्रतीर्थानां गीताविवृतिव्याख्यानम्

- वासुदेव. जे.
अध्यापकः, पूर्णप्रज्ञविद्यापीठम्

**स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा ।**
**इति भारतमाख्यानं कृपया मुनिना कृतम् ।।**

इत्युच्यते भागवते भगवता एव । एतादृश्याः कृष्णार्जुनसंवादरूपायाः सर्वभारतार्थसारभूतायाः भारतपारिजातमधुभूतायाः गीतायाः श्रीमद्भिः राघवेन्द्रतीर्थश्रीपादैः गीताविवृतिरिति एषा व्याख्या व्याख्याता ।

तत्रादौ 'लक्ष्मीनारायणं नत्वे'ति पूर्वार्धे मङ्गलं, 'कुर्मः श्रीकृष्णगीताया' इति च प्रतिज्ञां कृत्वा ग्रन्थं प्रारभते । तत्र त्रेधा गीतां विभज्य आद्यषट्के ज्ञानोपायोक्तिं मध्यषट्के ज्ञानोक्तिम् अन्तिमषट्के उभयप्रपञ्चनं च क्रियते इत्युक्तवन्तः ।।

आद्यश्लोक एव श्रीराघवेन्द्रश्रीपादानां व्याख्यानसौन्दर्यमवगम्यते जिज्ञासुभिः । आद्यश्लोके धृतराष्ट्रः पृच्छति सञ्जयं 'धर्मक्षेत्रे' इति । तत्र सः 'मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जये'ति पृष्टवान् । अत्र कौरवेष्वेव पाण्डवान्तर्भावे पाण्डवपदस्य पृथग्वचनकारणम् उक्तं श्रीपादैः 'पाण्डवानांभगवत्प्रियत्वं सर्वसाक्षिकमप्यजानन् धृतराष्ट्रः स्वपुत्राणां विजयविविदिषया सञ्जयं पप्रच्छ इत्यर्थः' इति ।।

एतादृशी व्याख्यानसुन्दरता ग्रन्थे सर्वत्र दृश्यते । तथा महारथा नाम के इति प्रश्ने उच्यते 'एको दशसहस्राणाम्' इत्यादिना । तथा आततायिलक्षणं सम्यग्तया सङ्गृहीतम् ।।

तथा द्वितीयाध्याये कृष्णो वदति- 'प्रज्ञावादांश्च भाषसे' इति । अत्र द्वेधार्थं कुर्वन्ति श्रीपादाः- प्रज्ञयोत्था वादाः स्वबुद्धिपरिकल्पिता इत्येकः । तथा यान् प्रभाषसे ते स्वबुद्धिकल्पिता एव, न प्राज्ञसम्मताः । इति द्वितीयः ।

अत्र आत्मनाशविषये दुःखं वा? देहनाशविषये वा? देहातिरिक्तात्माभावादिति वा? इति प्रश्नत्रयमुक्त्वा उत्तरान् सुन्दरं व्याख्यानरूपेण ददाति । तथा 'मात्रास्पर्शास्तु कौन्तेय' इत्यत्र 'मात्रास्पर्शा एव सुखदुःखदाः किम्'? इति काकुस्वरेण इति हृदयङ्गमतया व्याख्याति ।

तथा 'अन्तवन्त इमे देहा' इत्यादिक्लिष्टश्लोकानामपि बालानां यथा सुलभेन बोधो भवेत् तादृश-शैल्यनुसरणं कृतवन्तः । तत्र तत्र श्रुत्यादिप्रमाणानि उदाहृत्य व्याख्यानसौन्दर्यमधिकं कृतवन्तः। 'यदृच्छया चोपपन्नम्' इत्यत्र 'सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्' इत्यत्र च ये ईदृशं युद्धं प्राप्नुवन्ति ते सुखिन इति च ये सुखिनः पुण्यवन्तः ते एव ईदृशं भगवत्पूजारूपर युद्धं प्राप्नुवन्ति इति च विवृण्वन्ति ।

तथा षष्ठाध्याये योगविषये अद्भुततया सङ्गतिं प्रदर्शयन्ति । तथा दैवासुरसंपद्विभाग-योगाध्याये 'अभयं सत्वसंशुद्धिः' इत्यादिपदानां दम्भः, दर्प इत्यादिपदानां च अत्यन्ताद्भुतार्थान् वदन्ति । तथा ऊर्ध्वमूलमधश्शाखम् इत्यनेन निरूपितं जगद्वृक्षं वर्णयन्ति ।

एतादृशराघवेन्द्रतीर्थानां न एषैव व्याख्या सुन्दरा, किन्तु तत्वोद्योतादीनामपि अद्भुततया कृता टिप्पणिरस्ति । तादृशानां विषये श्रूयते च श्लोकः-

**चित्तेनायुक्तमर्थं कलयति सहसा नाभिधत्ते न सद्भिः....** ।। इति

तैरयुक्तं मनसापि नालोच्यते । अविचार्य किमपि नोच्यते । सज्जनैः साकं वृथा वादो न क्रियते । उक्तं न भूयः वक्ति । एते गुणाः तेषां ग्रन्थावलोके स्फुटीभवन्ति ।

अन्तिमतया वक्तव्यं चेत् तादृशी व्याख्या जिज्ञासुना जीविते एकवारं वा पठितव्या एव इत्युक्त्वा अस्माभिः सत्प्रबन्धप्रणयनविषये स्तूयते राघवेन्द्रः ।।

★★★

# पुराणानामध्ययनक्रमः

**- कृष्णः पुरोहितः**
**अध्यापकः, व्यासतीर्थगुरुकुलम्**

श्रीगुरुभ्यो नमः । अहमधुना पुराणाध्ययनपद्धतिमधिकृत्य किञ्चिदुदञ्चयामि ।

**भाषात्रयं न जानाति रीतीनां शतमेव च ।**
**पुराणार्थं वदन् याति नरकं नात्र संशयः ।।**

इति ब्रह्मपुराणोक्तरीत्या पुराणाध्ययनपद्धत्यनुसरणाभावे सर्वैपि पुराणाध्येतृवृन्दे नैकविधसन्देहसन्दोहतुन्दिलैर्मुहुर्मुहुर्मोमुह्यते । तथा विविधविपर्ययपर्यवसितनिरयपरम्परया प्रतिपदं चेक्लिश्यते इति सर्वैरपि परतत्वप्रेप्सुभिः सुतरां जागर्तव्यम् । सुजिज्ञासुसमुद्दिधीर्षया जगद्गुरुश्रीमन्मध्वाचार्येणैवं समुदघोषि-

**त्रिभाषां यो न जानाति रीतीनां शतमेव च ।**
**व्यत्यासादीन् सप्त भेदान्वेदाद्यर्थं तथा वदेत् ।।**
**स याति निरयं घोरमन्यथाज्ञानसम्भवम् ।**
**इत्यन्येषु च शास्त्रेषु तत्रतत्रोदितं बहु ।।**
**व्यत्यासः प्रातिलोम्यं च गोमूत्री प्रघसस्तथा ।**
**उक्षणः सुधुरः साधु सप्तभेदाः प्रकीर्तिताः ।।** इत्यादिवचनैः ।

त्रिभाषा नाम समाधिभाषा, गुह्यभाषा, दर्शनभाषा चेति ।

सर्वैरपि स्पष्टं यथा ज्ञायते तथाकथनं समाधिभाषा । यथा ''नास्ति नारायणसमं न भूतं न भविष्यति'' इत्यादिकम् ।

अर्थं निगूह्य कथनं गुह्यभाषा । यथा महाभारते **'नदीज लङ्केशवनारिकेतुर्नगाह्वयो नाम नगारिसूनुः । एषोऽङ्गनावेषधरः प्रमाथी जित्वाऽव यं नेष्यति चाद्य गावः ।।'** इति ।

हे नदीज= गङ्गातनय भीष्म । एष दृश्यमानः अङ्गनावेषधरः = स्त्रीरूपधारी, लङ्केशवनारिकेतुः= रावणवनभञ्जकहनूमद्ध्वजः, नगाह्वयः= अर्जुननामा, नगारिसूनुः= इन्द्रपुत्रः भोः भोः कौरवाः ! अयं प्रमाथी = हन्ता, अद्य वः= युष्मान् जित्वा गाश्च नेष्यतीत्यर्थस्य निगूहनाद् गुह्यभाषेत्यर्थः।

पाशुपतादिदर्शनमाश्रित्य कथनं दर्शनभाषा । यथा शान्तिपर्वणि रुद्रं प्रति कृष्णस्य तपश्चरणादिकथा । रीतीनां शतमेव चेत्यत्र मृदुपदाक्षरविन्यासो, वैदर्भीरीतिः । यथा 'वायवा याहि दर्शते मे सोमा अरङ्कृताः'। हे सर्वज्ञवायुनामक हरे! एतन्मन्दिरमायाहि, त्वदर्थं सोमरसः अलङ्कृतः तत् स्वीकुरु इति । अथ कठोरपदाक्षरविन्यासो गौडी रीतिः । यथा 'सृण्येव जर्भरी तुर्फरीतू नेतोशेव तुर्फरी पर्फरीका । उदन्यजेव जमेना मदेरू ता मे जराय्वरजं मरायु' इति । देववैद्यौ अश्विनौ, सृण्येव =अङ्कुशाद्यायुधविशेष इव, जर्भरी= औषधदानादिना भर्तारौ, तुर्फरीत्= क्षिप्रहन्तारौ, पर्फरीका= किसलयभूतौ कोमलौ । उदन्यजे इव= उदकजे इव समुद्रोद्भूतचन्द्रज्योतिषी इव, जेमना=सर्वातिशारितकान्तिमन्तौ मदेरू=सुखिनौ इत्यादि ।एवमेव सन्धिव्यत्यासः, देशव्यत्यासः, कालव्यत्यासः, कथाव्यत्यासः इत्यादिरीतीनां शतं शान्तिपर्वाद्युक्तरीत्या सूक्ष्मदर्शिभिरवश्यमवगन्तव्यम् । व्युत्क्रमेण कथनं प्रातिलोम्यम्, गोमूत्रमिव वक्रगत्या निरूपणसरणिर्गोमूत्री । 'घस आस्वादने' इति धातोः वक्तव्यकथायाः भक्षणमिव अनिरूपणं प्रघसः । गन्धोदकस्य प्रोक्षणमिव कथाया लेशतो निरूपणम् उक्षणः । 'उक्ष सेचने' इति धातोः । अपेक्षितस्य समग्रस्य निरूपणं सुधुरः । यथा 'वासुदेवपरा वेदाः वासुदेवपरा मखाः । वासुदेवपरा योगा वासुदेवपराः क्रियाः' इत्यादि । समाधि-भाषया सम्यङ् निरूपणं साधु । यथा 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि' इत्यादि ।

किञ्च परस्परपुराणविरोधपरिहारप्रकारप्रदर्शने जगद्गुरुश्रीमन्मध्वाचार्याणां मार्गदर्शनावश्यकत्वं लेशतः उपस्थाप्यते- शिबिरदाहानन्तरभाविनी कथा महाभारते तावदेवं श्रूयते । अश्वत्थामा पञ्चानामपि द्रौपदीसुतानां शिरांसि उत्कृत्य सुयोधनाय दर्शयामास । तद्दर्शनेन प्रतीकारहर्षोद्रिक्तः कौरवो ममार। भीमभीत्या द्रौणिरनन्तरमरण्यं तूर्णमनुपपात । रुष्टो भीमस्तमनुजगाम । तमनुजग्मुः कृष्णार्जुनौ युधिष्ठिरश्च । ततो द्रौणिरुपायान्तरमपश्यन्

ब्रह्मशिरोस्त्रममुञ्चत् । अर्जुनोऽपि तत्प्रतिष्टम्भाय प्रत्यस्त्रं प्रयुयोज । तन्मध्ये आविर्बभूव व्यासमहर्षिः । उभे अप्यस्त्रे उपसंहरतम् इति तौ आदिदेश । अर्जुनो भक्त्या उपसञ्जहार । अश्वत्थामा तदुपसंहारे न शशाक । तदा व्यास उपजहास- अस्त्रोपसंहारमजानन् कथं प्रायोक्षीः? कृतापराधमार्जनाय ते शिरोमणिमुत्कृत्य दीयतामिति । व्यासोपदेशेन द्रौणिः स्वशिरोमणिमुत्कृत्य भीमाय ददौ । व्यासकृष्णाभ्यामभिशप्तः पश्चात्तापाग्निसन्तप्तश्च द्रौणिः तपः तप्तुं विपिनं विवेश । इयं महाभारतगा कथा । भागवते त्वेवं पठ्यते- सुप्तानां पञ्चद्रौपदेयानां विधिविरुद्धवधं विधाय द्रौणिररण्यमनुदधाव । तमनुजग्मतुः कृष्णार्जुनौ । अथ द्रौणिर्ब्रह्मास्त्रं प्रयुयोज। अर्जुनस्तदुपसंहृत्य बबन्ध द्रौणिम् । बद्ध्वा पाञ्चालीसकाशमानिनाय । धीरोदात्तशान्तचित्ता पाञ्चाली गुरुसुतगौरवभावेन सान्त्वयामास । आततायिनमपि गुणज्येष्ठं गुरुसुतमिमं विमुञ्च । अहमिव एतन्माता कृपी अपि पुत्रशोकोद्विग्ना मा भूदिति । अथ पार्थः श्रीकृष्णप्रेरणानुसारेण द्रौणेः शिरोरत्नम् उत्कृत्य तममुञ्चत् इति ।

एवं भारतभागवतयोः कथाव्यत्यासे मन्ददृशो वयं कतरदिह श्रद्धधीमहि । नोभयमपि तथ्यं भवितुमर्हति खलु । यदेकं तथ्यं अपरमतथ्यं बोभूयादित्यहो को वा प्रेक्षावानेतादृशसमस्यापरिहाराय प्रयतेत?

सर्वज्ञश्रीमन्मध्वाचार्येण सप्रमाणं मार्गदर्शनमकारि । भागवते द्रौणेः मनःशास्त्रानुगुणं स्वप्नदर्शनमुक्तम् । भारते जाग्रत् तथ्यमुक्तमिति उभयमपि पथ्यमेव । उक्तं हि स्कान्दे-

**पार्थानुयातमात्मानं द्रौणिः स्वप्ने ददर्श ह ।**
**बन्धनं चात्मनस्तत्र द्रौपद्या चैव मोक्षणम् ।।** इति ।

एवङ्कारं भारतं भागवतं स्कान्दपुराणं चेत्येतत् त्रयं संशोध्य यः समग्रमधिजगाम स एवैवं समन्वितमर्थं विवरीतुं प्रभवेत् । 'एकं च तत्वतो ज्ञातुं विना सर्वज्ञतां नरः' इत्याद्युक्त्या सर्वैरपि पुराणाध्येतृभिः निर्णयाचार्यमार्गदर्शनानुसारेणैव नैकविधप्रकृष्टप्रमेयरत्नप्रभाप्रभावेण दिव्यपुरुषार्थ परम्पराभाग्भिर्भवितव्यमित्याशासे ।

★★★

# द्वैतमतरीत्या मोक्षसाधनम्

**सुशीलेन्द्र श्रीपाद गोग्गि**
**अध्यापकः, पूर्णप्रज्ञ विद्यापीठम्**

चत्वारः पुरुषार्थाः सन्ति । धर्मः, अर्थः, कामः, मोक्षश्चेति । धर्मात् अर्थः, अर्थात् कामभोगः, कामात् मोक्षः इति केचन वदन्ति । धर्माविरुद्धात् कामात् मोक्षः सञ्जायते इति सर्वैरङ्गीक्रियते । अथापि श्रीमन्मध्वाचार्यैः भक्तिः एव मुख्यतया मोक्षसाधनमिति पौनःपुन्येनोद्घोष्यते ।

**माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।**
**स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्न चान्यथा ।।**

इति महाभारततात्पर्यनिर्णये । अन्यत्रापि आहुः- **भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित्** - इति ।। अस्माभिरपि सर्वदा पठ्यते सभारम्भे -**मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम् ।।** इति ।। निर्मला भक्तिः कथं भवति? इति विचारणीयम् । परमात्मनः माहात्म्यज्ञानेन परमात्मनि आसक्तिर्जायते । विषयभोगस्य नश्वरत्वज्ञानेन संसारे विरक्तिः जायते। अर्थात् संसारे आसक्तिः नश्यति । अतः आदौ प्रपञ्चस्य नश्वरत्वं भगवतः माहात्म्यं च ज्ञातव्यम् । तदर्थं शास्त्रश्रवणं कर्तव्यम् ।।

मोक्षसाधनेषु प्रथमसाधनं श्रवणम् । श्रवणानन्तरं श्रुतो विषयः मन्तव्यः । मननेन तत्वनिश्चयो भवति । तत्वनिश्चयानन्तरं निदिध्यासनं कर्तव्यम् । निदिध्यासनमेव ध्यानम् । ध्यानेन परमात्मा प्रसीदति । प्रसन्नः परमात्मा स्वात्मानं दर्शयति । यदा साधकः परमात्मानं पश्यति तदा सः अपरोक्षज्ञानी भवति । अपरोक्षज्ञानेन अनेकजन्मार्जितं कर्म भस्मसात् भवति । आगामिकर्मणः लेपाभावश्च सिद्ध्यति । अस्यापरोक्षज्ञानिनः परमात्मनि स्वात्मात्मीय समस्तवस्तुभ्योऽधिकः अन्तरायसहस्रेणापि अप्रतिहतः निरन्तरप्रेमप्रवाहः प्रसरति । इयमेव 'परमभक्तिः' इत्युच्यते । अनया अनन्यया भक्त्या प्रीतो देवः 'एनं मोचयामि' इति इच्छति

। अनया हरीच्छया अस्य बन्धः निवर्तते । अर्थात् संसारकारणीभूतः लिङ्गदेहः भिद्यते । तदा भगवतः इच्छावरणेऽपगते स्वरूपभूतस्य आनन्दस्य अनुभवो भवति । अयमेव मोक्ष इत्युच्यते।।

एवं श्रवण-मनन-निदिध्यासन-भक्ति-प्रसाद-अपरोक्षज्ञान-परमभक्ति-मोचकप्रसादद्वारा प्रीतोदेवः मोक्षं प्रददाति इति सिद्धान्तः ।।

**तदुक्तम् अनुव्याख्याने-**

**जिज्ञासोत्थज्ञानजात् तत् प्रसादादेव मुच्यते ।। इति ।।**

द्वैतवेदान्ते मोक्षसाधनं किम्? इति पृष्टे- 'भगवान् विष्णुरेव मोक्षसाधनम्' इति उत्तरम् देयम्। साधनं द्विविधम्- सिद्धम्, असिद्धं चेति। तत्र च्छेदनं प्रति कुठारादिरूपरसाधनम् सिद्धं साधनम्। स्वर्गं प्रति यागादिरूपरसाधनम् असिद्धम् । तत्र असिद्धं साधनमस्मत्प्रयत्नेन निष्पादनीयम् । सिद्धन्तु साधनं सव्यापारीकरणीयम् इति ।।

यथा हस्ते कुठारोऽस्ति, अथापि वृक्षस्य च्छेदनं न भवति । तदर्थं कुठारस्य उद्यमनं निपतनं च भवेत् । उद्यमन-निपतनाभ्यां कुठार-वृक्षयोरभिघातसंयोगो जायते । तेन वृक्षच्छेदनं भवति । तथैव मोक्षं प्रति विष्णुः सिद्धं साधनम् । प्रसाद एव तस्य व्यापारः । अस्माभिः विष्णोः प्रसन्नतायै प्रयत्नः कर्तव्यः । अत एव श्रवणमननादिः । श्रवणमननादिभिरुपायैः प्रसन्नः भगवान् मुकुन्दः स्वरूपानन्दम् अनुभावयति । वयं सर्वे मध्वपतिनारायणमेव शरणं व्रजेम ।।

★★★

# श्रीमहाभारतयुद्धे श्रीकृष्णपात्रम्

**- आर्.विटोबाचार्यः**

निदेशकः, वेद-वेदान्ताध्ययन-शोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

श्रीमहाभारतयुद्धे श्रीकृष्णमहत्पात्रं किञ्चिदुदञ्चयामि ।

**परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।**

इति खलु सद्धर्मसंस्थापकश्रीकृष्णस्य धर्माचरणनिपुणसंरक्षणप्रतिज्ञा शोश्रूयते । सदा सकलविधधर्मप्रतिनिधिभूता हि धर्मराजादय इत्यत एव श्रीकृष्णकृपापात्रभूताः । तथा जन्मत एव निरन्तर-परप्रतारणस्वार्थपरायणधिषणा हि दुर्योधनादयः सर्वाधर्मप्रतिनिधिभूताः । अथापि युद्ध-साहाय्याकाङ्क्षिणे दुर्योधनाय तत्कार्तघ्न्यकापट्यादिप्रदर्शनाय दशलक्षसङ्ख्याकावध्ययादवसेना श्रीकृष्णेन प्रादायि । विषप्रयोगजतुगृहदहनवनवासाद्यनेकक्लेशपरंपरया चेक्लिश्यमाना अपि कुरुकुलविनाशनिरावणान्तःकरणैर्धर्मिष्ठधर्मराजादिभिः सम्प्रार्थितः सम्प्रेषितश्च श्रीकृष्णः सामोपायसान्त्वनवचनैः 'पञ्चग्राममात्र-प्रदानेन पाण्डवाः सन्तुष्यताम् अखण्ड-भूमण्डलाधिपत्यं त्वयैवानुबोभूयताम्' इत्युवाच । दृप्तदुर्योधनेन 'सूच्यग्रप्रदेशोऽपि नैव दीयते' इत्याघोष्य कृष्णबन्धनोद्यमे दुष्टसहोदरकूटेन प्रायत्यत । एवङ्कारं कौरवाणां कात र्घ्न्यकापट्यदौष्ट्यादिविशिष्टस्वार्थपराकाष्ठां प्राकट्य दुष्टविनिग्रहशिष्टानुग्रहलक्षणभारत सङ्ग्रामे मुरारिर्महत्त्वपूर्णपात्रं बिभराम्बभूव ।

अथ प्रवृत्ते शस्त्रसम्पाते सति सेनयोरुभयोर्मध्ये युद्धपराङ्मुखं जर्जरीभूतकलेवरं पार्थं प्रति 'क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप' इत्याद्यविगीतदिव्यगीतोपदेशेन क्षणमात्र एव सुदृढात्मस्थैर्योत्साहभरिततया पार्थं चमच्चरीकराञ्चकार । तथा पार्थं निमित्तीकृत्य संसाररणरङ्गे विषण्णसाधुगणमपि सद्धर्मसंस्थापकजीवनसाधनपरतया परिबोधयाञ्चकार ।

अथ दशदिनपर्यन्तं विपुलपाण्डवसैन्यविध्वंसनपटोर्भीष्मस्यान्तरङ्गभक्तिमादृत्य स्वनियममपहाय चक्रायुधधरदिव्यरूपदर्शनमनुगृह्य उभयपक्षीयभक्तवात्सल्यपराकाष्ठां प्राकाश्य कृतकृत्यान्तःकरणं भीष्मं शरशय्यायां शाययामास । अथ कुपितभगदत्तस्त्वमोघवैष्णवास्त्रं पार्थे प्रायुङ्क्त । तदा झटिति श्रीकृष्णः पार्थपुरत उत्थाय तं स्ववक्षसि बभ्रे । अहो तदस्त्रं तत्र दिव्य-वैजयन्तीमालायितम् ।

अथ त्रयोदशदिने कृष्णार्जुनौ दूरीकृत्य युधिष्ठिरबन्धनोद्देशेन दुर्योधनो नवकोटि सङ्ख्याकबलिष्ठसंशप्तकगणान् प्रेषयामास । पार्थस्तान् सर्वान् सम्मोहनास्त्रादिना लीलया विजिग्ये । तदवसरे द्रोणकृतदुर्गमपद्मव्यूहं प्रभिद्य वीराभिमन्युर्वैरिगणमारणहोमे प्रळयरुद्रायितः । जयद्रथकर्णप्रभृतयः तत्पुरतः स्थातुमसमर्थाः दुर्योधनप्रेरणया अधर्ममार्गेण तं मारयामासुः । तदाकर्ण्य क्रुद्धः पार्थः सूर्यास्तात् प्रागेव जयद्रथहनने प्रतिजज्ञे । जयद्रथरक्षणाय द्रोणेन शकटव्यूह-चक्रव्यूह-पद्मव्यूहत्रयं व्यरचि । अग्रद्वारे एव द्रोणेन पार्थो न्यवारि ।

अथ पार्थप्रार्थनया श्रीकृष्णः कालात्ययनिवारणाय द्रोणप्रदक्षिणमार्गेण मनोवेगेन रथमनैषीत् । 'रथं मनोवेगमथानयद्धरिर्यथा शराः पेतुरमुष्य पृष्ठतः' इत्युक्तरीत्या पार्थप्रयुक्तशराः पार्थस्य पृष्ठतो यथा पेतुस्तथा रथं निनायेति भारतयुद्धे प्रतिपदं धर्मिष्ठसररक्षणचणचमत्कार-वैविध्यमनुबोभूयते । अथ पार्थप्रतिज्ञापूरणाय श्रीकृष्णः अकाल एव तमः ससर्ज । सूर्यास्तभ्रान्त्या द्रोणादयो विशश्रमुः । पार्थस्याग्निप्रवेशं द्रष्टुं हृष्टो जयद्रथः पार्थाग्रे आजगाम । श्रीकृष्णप्रेरणया फल्गुनस्तच्छिरश्छित्वा पुङ्खानुपुङ्खबाणैः तत् पितुर्वृद्धक्षत्रस्यैव करद्वारा निपात्य तच्छिरोऽपि चूर्णयाञ्चकार ।

अथ द्रोणमरणानन्तरं प्रक्षुब्धेनाश्वत्थाम्ना अमोघनारायणास्त्रं प्रायोजि । तदा श्रीकृष्णमहिम्नैव सर्वे परिरक्षिताः भक्ताग्रगण्यभीमभागवतोत्तमधर्मश्च प्राकाशि । अथाश्वत्थाम्ना दिव्याग्नेयास्त्रे प्रयुज्यमाने तत्क्षणे एकाक्षोहिणी सेना भस्मीबभूव । तत्सन्दर्भे पार्थसारथिश्चमत्कारेण तद्रथो झटिति नभसि उड्डीय चकासाञ्चकार । यथोक्तम् 'अक्षोहिणी निहता चात्र सेना पार्थं सयानं हरिरुज्जहार । जीवन्तमालोक्य सुरेन्द्रनन्दनं द्रौणिः कोपात् कार्मुकं चापहाय' इत्यादि । तथैव

भीमपराजितः कर्णः कोपादमोघास्त्रं पार्थे प्रयुयोज । तदापि हरिरतिजवेन रथमन्यत्रानीय पार्थं ररक्ष । अथ घटोत्कचद्वारा बलाधिक्यं प्रदर्श्य श्रीकृष्णः कौरवादीनभीषयत् । घटोत्कचभयङ्करयुद्धेन बम्भ्रम्यमाणकौरवाः शक्त्यायुधद्वारा संहर्तुं कर्णं सञ्चोदयामासुः । 'अस्मिन् हते हतं सर्वं किं नः पार्थः करिष्यति' इत्यादिरीत्या शक्त्यायुधप्रयोगेण कष्टात् घटोत्कचो ममार । इत्थं कर्णशक्त्यायुधादपि हरिरर्जुनं ररक्ष । अथ सङ्क्रुद्धेन कर्णेन पार्थललाटे दिव्यनागास्त्रं द्रुतं प्रायोजि । तदा हरिस्त्वरया रथं पञ्चाङ्गुलं भूमौ अवनतं कृत्वा पार्थं परिररक्ष । एवमेव गाण्डीवनिन्दनादिना विवदमानं धर्मराजं पार्थात् ररक्ष । पश्चात्तापेन आत्महत्योद्युक्तं पार्थं च सत्यधर्ममर्मप्रबोधनद्वारा समरक्षयत् । किञ्च -

**धनञ्जयस्तिष्ठति वारितो मया जनार्दनो नैव विरोधमिच्छति ।**
**वृकोदरस्तद्वचने स्थितः सदा युधिष्ठिरः शान्तमनास्तथा यमौ ।।**

इत्याद्यश्वत्थामादिस्तुतिततिभिः उभयपक्षीयभक्तवृन्दैः श्रीकृष्णस्यानितरसाधारण-परिपूर्णधर्मपरत्वं भक्तसंरक्षणचमत्कारवैविध्यम्, अधर्मिष्ठनिर्मूलनलीलाकौशल्यादिकं सहस्रशः समुज्जृम्भन्ते।।

★★★

# किमिदमवच्छेदकत्वम्?

डा. श्रीनिधि
**संशोधनसहायकः,**
वेद-वेदान्ताध्ययन-शोधसंस्थानम्
वसन्तकुञ्ज, नवदेहली

**काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।** पदविचारे पाणिनीयस्योपयोग इव पदार्थविचारे (उपलक्षणतया गौतमीयस्य) अर्थात् तर्कशास्त्रस्य बहूपयोगोऽस्ति। तत्रापि तर्कग्रन्थेषु विद्यार्थिनां तावत् क्वचित् 'घटत्वावच्छिन्ना,' 'संयोगसम्बन्धावच्छिन्ना' इत्येवं सर्वत्रावच्छेदकम् अवच्छिन्नमिति दृष्ट्वैव शिरोवेदना जायते। अवच्छेदकताविदां तु तर्कोऽपि रम्यो भवति। तस्मात्तज्ज्ञानमत्यावश्यकम्। अनिवार्यश्च शास्त्रजिज्ञासूनाम्।

अवच्छेदकम् इत्येतत् 'अवपूर्वकेण छिदिर् द्वैधीकरणे' इति धातुना निष्पन्नम्। द्वैधीकरणं च पृथक्करणम्। प्रकृत 'इदमस्मात्पृथक्' इति येन ज्ञाप्यते सोऽवच्छेदकः। इतरव्यावर्तक इति भावः। व्यावर्तकस्तावदवच्छेदकः। व्यावर्त्यः (व्यावृत्तः) अवच्छेद्यः (अवच्छिन्नः)। व्यावर्तनं तु समानानामनेकानां समुदाये एकस्य पृथक्करणम्। तदेवात्रावच्छेदनम्।

तच्च बहुधा सम्भवति। देशविशेषस्यावच्छेदकत्वं यथैकस्मिन्नेव वृक्षे मूलदेशोऽन्यः। अग्रदेशोऽन्यः। वृक्षे कपिरस्तीत्युक्ते कुत्रास्ति? अधः पश्यामश्चेत्तदभाव एवोपलभ्यते। किन्तूपर्येवास्ति। तत्र वदामः। एकस्मिन्नेव वृक्षे मूलदेशावच्छेदेन कपिसंयोगाभावः। अग्रदेशावच्छेदेन कपिसंयोगः। अत्र संयोगस्य अग्रदेशोऽवच्छेदकः। स चैकस्मिन्नेव वृक्षे विद्यमानं (समानं) संयोगं संयोगाभावाद् मूलदेशं व्यावर्तयति।

एवं कालविशेषोऽप्यवच्छेदको भवति। यथा चैत्रो दशमे वयसि बाल आसीत्। इदानीं

तु वृद्धः । चैत्रे बाल्यमस्त्युत वृद्धत्वं वेति पृष्टे वदामस्तदा बाल्यं दशमे वयसि । न त्विदानीम् । वृद्धत्वमिदानीं न तु तदा । दशमवयःकालावच्छेदेन बाल्यम् । सः कालविशेषः चैत्रीयमेवेदानींतन-वयः व्यावर्तयति । तथेदानींतनकालावच्छेदेन वृद्धत्वम् । एवं कालस्यावच्छेदकत्वम् ।

एवं च बहुषु स्थलेषु घटत्वादिकं प्रतियोगितादिपारिभाषिकपदार्थानामवच्छेदकं दृश्यते । तद्यथा घटो नास्तीत्यत्यन्ताभावो वर्तते । 'तदीया प्रतियोगिता' इत्येवोक्ते किन्निष्ठेति जिज्ञासायां घटनिष्ठेति वदामः । तत्र च घटमात्रनिष्ठेति वाच्यम् । का सा प्रतियोगिता? घटेषु च कस्मिन् घटे वर्तते? इत्याकारक्षायां सकलघटनिष्ठा इत्येवोत्तरम् । यतो न कोऽपि घटोऽत्रास्ति । अत्रेदानीं चिन्त्यं सकलघटनिष्ठा घटेतरानाश्रिता प्रतियोगितेति । प्रतियोगितेत्युक्त एव नैवं ज्ञायते । प्रतियोगितासामान्यं सर्वत्रास्ति। पटे पटाभावीया पुस्तके पुस्तकाभावीया । तत्रैवं सति घटमात्रवृत्तिः सकलघटवृत्तिः प्रतियोगिता या सा घटत्वतुल्या । तद्यथा घटत्वं यत्र वर्तते तत्र सर्वत्रेयं प्रतियोगिता वर्तते । घटत्ववत्स्त्वेव च वर्तते । घटत्वापेक्षया न न्यूनेषु नाप्यतिरिक्तेषु । प्रतियोगितातः घटत्वमन्यूनानतिरिक्तवृत्ति। तस्माद्घटत्वमवच्छेदकम्।घटत्वंचस्वसहवृत्तिप्रतियोगितांपटादिगतप्रतियोगिताभिःतत्तद्घटमात्र-वृत्तिप्रतियोगिताभिश्च व्यावर्तयति । समानासु प्रतियोगितासु इयमेव प्रतियोगिता या मदन्यूनवृत्तिः मन्मात्रसहचारिणी सा ग्राह्येति ज्ञापकोऽवच्छेदकः । अत्र घटो नास्तीत्यभावीयप्रतियोगितावच्छेदकं न द्रव्यत्वम् । तस्यातिरिक्तवृत्तित्वात् । प्रतियोगिताभाववत्यपि पटादिषु द्रव्यत्वं वर्तते हि । नाप्यस्याः प्रतियोगिताया अवच्छेदकं नीलघटत्वम् । तस्य न्यूनवृत्तित्वात् । इयं प्रतियोगिता पीतघटेऽप्यस्ति यस्मात् । तस्मादन्यूनानतिरिक्तवृत्त्योः समानाधिकरणयोः प्रकृतपारिभाषिकपदार्थयोः अवच्छेद्यावच्छेदकभावः ।

तथा क्वचिद्विशिष्टमित्यर्थेऽवच्छिन्नमिति वदामः । यथा घटत्वावच्छिन्नं नास्तीत्युक्ते घटत्वविशिष्टो घटो नास्तीत्यर्थः । घटत्वं च घटस्य विशेषणमवच्छेदकम् । घटत्वेन सकलघटसङ्ग्रहो भवति । तेन घटत्वावच्छिन्नप्रतियोगिताकाभाव इति लभ्यते ।

एवं सम्बन्धस्याप्यवच्छेदकत्वमस्ति । यथा घटः भूतले संयोगेन, कपाले समवायेन, काले

कालिकेनेत्येवं बहुषु बहुधा वर्तत इत्येकस्मिन्नेव घटे बह्व्य आधेयताः सन्ति । तत्राधेयता का प्रकृतग्राह्येति ज्ञापकोऽवच्छेदकः । स चेतराधेयतायाः सकाशादेनां व्यावर्तयति । यः पदार्थः येन सम्बन्धेन भवति स तत्पदार्थनिष्ठप्रकृतपारिभाषिकपदार्थस्यावच्छेदकः। संयोगसम्बन्धावच्छिन्नाधे-यतेत्यादि यथा । एवं तत्र तत्र यथायोग्यमवच्छेदकत्वं वेद्यम् ।।

★★★

# चोदनालक्षणोऽर्थो धर्मः

- श्रीवत्स.जे.
अध्यापाकः वेदव्यासविद्यापीठम्

चोदनालक्षणोऽर्थो धर्मः- अस्य सूत्रस्य भाष्यकारमतानुसारेण अर्थवर्णनम् । चोदना इति क्रियायाः प्रवर्तकं वचनम् । तत्तु विधिप्रत्ययघटितवाक्यम् (विधिलिङ्, लोट, लेट्, क्तव्यत्) यथा आचार्येण विधिघटितवचनेन चोदितः शिष्यः 'करोमि' इति वदति । तथा च शिष्यप्रवृत्तिजनकम् आचार्यप्रयुक्तचोदनावाक्यं कारणम् इति हि दृश्यते । येन लक्ष्यते तल्लक्षणम् । यथा धूमः लक्षणम् अग्नेः इति वदन्ति ज्ञापक इति यावत् ।

तादृशचोदनया यो लक्ष्यते सः अर्थः पुरुषं निःश्रयसेन संयुनक्तीति प्रतिजानीमहे । शब्दसामान्यस्यैव हि तादृशं सामर्थ्यं यत् भूतं, भविष्यन्तं, सूक्ष्मं, व्यवहितं, विप्रकृष्टम्, इत्येवञातिकमर्थं ज्ञापयितुं शक्यम् । न अन्यप्रमाणानाम् ईदृशं सामर्थ्यम् । इन्द्रियस्य तत्सामर्थ्याभावात् । तत्पूर्वकत्वाच्चेतरेषाम् । ननु अतथाभूतमपि अर्थं ब्रूयात् चोदना। यथा यत्किंचन लौकिकं वचनं यथा नद्यास्तीरे पञ्च फलानि सन्ति इति । तत् प्रमाणमपि भवेत् अप्रमाणमपि भवेत् । अत्रोच्यते विप्रतिषिद्धमिदमुच्यते ज्ञानं जायते न जायते इति । ब्रवीति इति यदि उच्यते अवगम्यते बुध्यमानस्य वचनं निमित्तं भवतीति । तादृशनिमित्ते सति अवगम्यते सः अवबोधयति । यदि च चोदनावचनात् अग्निहोत्रहोमात् स्वर्गः भवतीति अवगम्यते । कथमुच्यते न तथा भवतीति । असन्तमर्थं अवबुध्यते इति विप्रतिषिद्धम्।

न च 'स्वर्गकामो यजेत' इति वचनात् संदिग्धम् अवगम्यते भवति वा स्वर्गः न वा भवतीति । न च निश्चयेन अवगम्यमानमिदं मिथ्या स्यात् । यो हि जनित्वा प्रध्वंस्यते नैतदेवम् इति सः मिथ्याप्रत्ययः । न चास्य कालान्तरे, पुरुषान्तरे, देशान्तरे, अवस्थान्तरे वा बाधकप्रत्ययो भवति । अतः अप्रमाणं न । यत्तु लौकिकं वचनं तच्च प्रत्ययितात् पुरुषात् मूलप्रमाणविषयं प्रमाणमेव । यदि

अप्रत्ययितात् पुरुषात् विश्वस्तत्वं-प्रत्ययितात्वं (प्रमाणविषयं) पुरुषबुद्धिप्रभवम् अप्रमाणमेव । तत्पुरुषेण वैदिकवचनात् ऋते ज्ञातुमशक्यम् । अपरपौरुषेयात् वचनात् अवगतमिति चेत् तदपि तेनैव तुल्यम् । एवञ्जातीकेषु अर्थेषु न पुरुषवचनं प्रामाण्यम् उपैति । यथा जात्यन्धानां वचनं रूपविशेषेषु अप्रमाणं तथा इति । ननु अविदुषाम् उपदेशो नावकल्प्यते मन्वादय उपदिष्टवन्तः तस्मात् पुरुषः सन्तः विदितवन्तश्च । यथा चक्षुरिन्द्रियेण रूपमुपलभ्यते इति दर्शनादेव अवगतम् । न उपदेशा हि व्यामोहादपि भवन्ति । असति व्यामोहे वेदादपि भवन्ति ।अपि च पौरुषात् वचनात् 'एवमयं पुरुषो वेद' इति भवति प्रत्ययः न तु 'एवम् अयं अर्थः भवति' इति । कुत्रचित् पुरुषकृतात् वचनात् प्रत्ययो विप्लवते हि । न तु वेदवचनस्य मिथ्यात्वे किंचन प्रमाणमस्ति ।।

ननु वेदवचनम् अप्रमाणं वचनत्वात् नदीतीरे फलानि सन्तीति लौकिकवचनवत् इत्यनेन अप्रामाण्यं साध्यते इति चेन्न । अन्यत्वात् । न हि अन्यस्य वितथाभावे अन्यस्य वैतथ्यं भवितुमर्हति। न हि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुम् अर्हति । अपि च पुरुषवचनसाधर्म्यात् वेदवचनम् अप्रमाणम् इत्यनुमानं व्यपदेशात् अवगम्यते । वेदवचनेन प्रत्ययः अनुभवसिद्धः । न च अनुमानं प्रत्यक्षविरोधि प्रमाणं भवति । तस्मात् चोदनालक्षणोऽर्थः (चोदनाप्रमाणख्यः) श्रेयस्करः । एवं तर्हि श्रेयस्करो जिज्ञासितव्यः, किं धर्मजिज्ञासया ? । य एव श्रेयस्करः स एव धर्मशब्देन उच्यते । कथम् अवगम्यते । यः यागमनुतिष्ठति तं धार्मिक इति समाचक्षते । यश्च यस्य कर्ता भवति सः तेन व्यपदेश्यते । यथा पाचकः । तेन पुरुषं यः निश्रेयसेन संयुनक्ति सः धर्मशब्देन उच्यते । न केवलं लोके । वेदेऽपि 'यज्ञेन यज्ञम् अयजन्त देवाः तानि धर्माणि प्रथमान्यासन्' इत्यत्र यजतिशब्द-वाच्यमेव धर्मं समामनन्ति । ईदृशचोदनया उभयं लक्ष्यते अर्थः अनर्थश्चेति । कः अर्थः-यः निश्रेयसाय, यथा ज्योतिष्टोमादिः। क अनर्थः यः प्रत्यवायाय, यथा श्येनः। तत्रानर्थः धर्मो मा भूत् इति सूत्रे अर्थग्रहणम् ।

कथं पुनरनर्थः विधीयते । हिंसा हि सा । हिंसा च प्रतिषिद्धा इति । कथं पुनरनर्थः कर्तव्यत्वेन उपदिश्यते । उच्यते । श्येनादयः नैव कर्तव्या निज्ञाप्यन्ते । यो हि हिंसितुम् इच्छेत् तस्य अयमुपायः इति हि तेषामुपदेशः । 'श्येनेन अभिचरन् यजेत' इत्येव समामनन्ति न तु श्येनेन अभिचरितव्यमिति ।

ननु अशक्तमिदं सूत्रम् इमौ अर्थौ अभिवदितुम् । चोदनालक्षण एव धर्मः नेन्द्रियलक्षणः । अर्थश्च धर्मः न अनर्थ इति । एकमिदं वाक्यं तदेवं सति भिद्येत । (विध्यावृत्तिरूपवाक्यभेदः स्यात्-मीमांसानये एकवाक्यस्य एकविधिप्रत्ययघटितस्य एकाज्ञातविषयज्ञापने एव सामर्थ्यं यदि अर्थद्वये विधेयत्वं पर्यवस्यति, तर्हि विधेः आवृत्तिः कर्तव्या । तद्विशिष्टवाक्यस्य भेद इति यावत् । उच्यते । यत्र वाक्यात् अर्थ अवगम्यते तत्रैव वाक्यभेदः । तत्तु वैदिकेषु न तु सूत्रेषु । अन्यतः अवगते अर्थे सूत्रमेवमर्थं अर्थमिदमित्यवगम्यते । अत एव एकदेशः अनेन सूत्र्यते इति सूत्रम् । चोदनालक्षणः, अर्थो धर्मः, इमौ एकदेशौ इत्यवगन्तव्यम् । तथा च विशिष्टानेकार्थबोधकत्वं सूत्रस्य गुण एव न तु दोष इति । अथवा अर्थभूतस्य चोदनालक्षणस्य धर्मत्वमात्रं विधीयते इति न विधेयद्वयम् इति न वाक्यभेदः इति । तथा च 'विधिविहितत्वे सति इष्टसाधनत्वम्' धर्मस्य लक्षणम् ।।

******

# Sadacharasmruthi

## Ashwij, 2th Std

The book named "**Sadacharasmruthi**" is written by Shri 'Madhwacharya'. It's a very useful book for every Brahmin. Each and every Brahmin should follow this book. There are many things which we do not know about how we should be in our daily life. But this book will help you in your daily life.

**'ಆಚಾರಹೀನಂ ನ ಪುನಂತಿ ವೇದಾಃ''** means for one who does not follow the things mentioned in Sadacharasmruthi, his life will be wasted. Not for him but also it is a waste for the world.

Sadacharasmruthi:- The people who are born in this world should follow all the procedures to get "Moksha". Shriman Madhwacharya by collecting all vedas, Shastras has told that **'ಶ್ರೀಹರಿಯೇ ಸರ್ವೋತ್ತಮ''** Because by getting locked in work pressure, he will forget that how he should be in his daily motion. So by seeing all this Sadacharasmruthi book was made.

ಶೌಚ :- (cleanliness)

To be called a Brahmin, he should be clean, without cleanliness if he makes pooja or something it's useless.

There are two types of cleanliness 1. Outside cleanliness - Being clean from Soil and water 2. Inside cleanliness - Being far from Sex and Anger. 1.. 2..

Dressing up:-

There are 10 types of clothes which has been prohibited.

1. Dressing without washing is prohibited.

2. Only wearing Dhotra without Shawl.

3. Wearing 2 folded cloth.

4. Wearing clothes which are torn or damaged.

5. Wearing Stitched dresses.

6. Tying knot while dressing.

7. Wearing dress one over another.

8. Wearing only Langoti.

9. Wearing Orange colour dress by one who is not a Sage.

10. Without wearing any dress that is being completely naked.

All the 10 kinds have been strictly prohibited.

While wearing dothra his yajnopaveetam should be worn on his right ear. There are many procedures also for performing pooja. How the mudras should be applied in our body? How the brahmachari should make sandhyavandane? What is brahmayajna? All these topics are mentioned in Sadacharasmruthi.

All the day today activities which we do from the time we wake up till we sleep has been mentioned here.

# Why should we worship God?

Shrinidhi. C. Bhat .

As one of the phrase says that all the living things in the world " Sukhameva me syat dukham managapi maa bhoot", all want only happiness and not the sorrows. The happiness which the living things want are of two types.

First happiness is that which the living things can get it for fraction of seconds, but another happiness is that which gives longer happiness, which will survive the death of a person. In the second type of happiness we get two other types of happiness namely Swarga and Moksha.

Swarga is not the permanent one. But moksha is permanent. One who attains this moksha would not have rebirth in this world. To attain such moksha, the person should do some of the extra works.

As our philosopher Shri "Madhwacharya" said 'ಸಂತತಂ ಚಿಂತಯೇಽನಂತಮ್'. We should always keep recalling the supreme God in our mind. The four purusharthas namely Dharma, Artha, Kama, Moksha are only available by the proper knowledge of God. Not only studying veda or vedangas, we should have devotion towards him.

As one of the laws says 'ಭಕ್ತ್ಯೈವ ತುಷ್ಟಿಮಾಪ್ನೋತಿ ವಿಷ್ಣುಃ'. The devotion is the only thing which we can use towards God in order to attain salva-

tion. The devotion will be the reason for salvation. That devotion is of 9 types.

"Shravanam keertanam vishnoho smaranam paadasevanam

Archanam vandanam daasyam sakhyam Aatmanivedanam"

Through these 9 types devotion we should pray God, as the great scholars said. One who Prays God by these, God showers sympathy on us and gives us health, wealth and happiness. As an example we see many stories in puranas as well as in Mahabharatha and Ramayana. A person shows devotion towards him, how can the god keep quietly in the matter of that person?

One who follows these kamas, supreme God will give us the salvation, which is the permanent happiness. Because 'ಕಿಮಲಭ್ಯಂ ಭಗವತಿ ಸುಪ್ರಸನ್ನೇ ಶ್ರೀನಿಕೇತನೇ' which means that if God is satisfied by our karmas, he can give us anything. So we should all worship God in order to attain the supreme salvation.

★★★

# Ashtavakra in Mahabharata

Shrivatsa. P. Badri

While the Pandavas were wandering among holy places in the forest; They came one day to the hermitage of the personages immortalised in the upanishads. Lomasa told yudhishtrira the story of that place.

Uddhalaka a great sage and teacher of vedanta had a disciple named Kagala who was virtuous and devoted but had no great weight to his disciples lack of erudition but readily appreciated his virtues, devotion and good conduct and gave his daughter sujata in marriage to him.

The couple was blessed with a son. A child generally inherits the characteristics of the parents, but fortunately the grandson of uddhalaka took after his grandfather rather than his father and knew the vedas since the time he was in his mother's womb. When kagala made mistakes as he often did in reciting the vedas the child in the womb would twist his body with pain and so it came to pass that he had eight crooks in his body when he was born. These crooks earned him the name of Ashtavakra which means Eight Crooks.

Kagola, on one ill-fated day, participated in a polemical contest with vandi, the court scholar of Mithila and having been defeated was made to drown himself.

Meanwhile Ashtavakra grew up to be a towering scholar even in his boyhood, and at the age of twelve he had already completed his study of the vedas and the Vedanta.

One day, Ashtavakra learnt that Janaka, the king of Mithila was performing a great sacrifice in the course of which the assembled scholars would, as usual, debate on the Shastras. Ashtavakra set ou for Mithila. Accompanied by his Uncle Swetaketu.

On their way to the Place of Sacrifice at Mithila, they came across the king and his retinue. The attendants of the king marched in front shouting: Move away, make way for the king. Ashtavakra instead of moving out of the way said to the retainers: O royal attendants, even the king, if he is righteous has to move and make way for the blind, the deformed, the fair sex, persons bearing loads and Bramanas learned in the vedas. This is the rule enjoined by the Scriptures. The king, surprised at these wise words of the Brahmana boy accepted the justness of the rebuke and made way, observing to his attendants: What this Brahmana stripling says is true. Fire is fire whether it is tiny or big and it has the power to burn.

Ashtavakra and Shwetaketu entered the sacrificial hall. The gate-keeper stopped them and said:- "Boys cannot go in, only old men learned in the Vedas may go into the Sacrificial hall". Ashtavakra replied:- "We are not mere boys, we have observed the necessary vows and have learnt the vedas. Those who have mastered the truths of the Vedanta will not judge another on mere considerations

of age of appearance". The gate-keeper said:- "Stop, have done with your idle brag, how can you a mere boy, have learnt and realised the Vedanta"?

The boy said:- "You mean I am not big like an over-grown with no substance in it? Size is no indication of knowledge or worth, nor is age. A very tall old man may be a tall old fool. Let me pass".

The gate-keeper said:- "You are certainly not old nor tall, though you talk like all the hoary sages, get out". Ashtavakra replied "Gate-keeper, grey hair does not prove the ripeness of the soul. The really Mature Man is the one who has learnt the Vedas and the Vedangas. Mastered there gist and realized there essence. I am here to meet the court pandit Vandi. Inform king Janaka of my desire.

At that moment the king himself came there and easily recognized Ashtavakra, the precociously wise boy he had met before. The king asked:- "Do you know that my court pandit Vandi has overthrown in argument many great scholars in the past and caused them to be cast into the ocean? Does not that deter you from this dangerous adventure"?

Ashtavakra replied "Your eminent scholar has not encountered men like me who are proficient in the vedas or vedanta. He has become arrogant and vain with easy victories over good men who

were not real scholars. I have come here to repay the debt due on account of my Father, who was defeated by this man and was made to drown himself, as I have heard from my mother. I have no doubt I shall vanquish vandi whom you will see crumple up like a broken wheeled cart, Please summon him". Ashtavakra met Vandi, they took up a debatable thesis and stormed an argument, each employing his utmost learning and wits to confound the other; and in the end the assembly unanimously declared the victory of Ashtavakra and the defeat of Vandi. The court pandit of Mithila bowed his head and paid the forfeit by drowning himself in the ocean and joint to the abode of Varuna.

Then the spirit of Kagala the father of Ashtavakra gained peace and joy in the glory of his Son. The author of the epic instructs us through these words put in Kagalas mouth:- A son need not be like his father, a father who is physically weak may have a very strong son and an ignorant father may have a scholarly son. It is wrong to access the greatness of a man on his physical appearance or age. External appearances are deceptive which shows that the unlearned Kagala was not devoid of common sense

★★★

# FESTIVALS COUNTRY

- Sanket kulkarni

India is a country of great culture. It is named as ‘‘FESTIVALS COUNTRY’’. In our country so many people are following their own castes but our country follows Hinduism. All country people are following our culture because we have ‘‘Vedas and Philosophies’’ and mainly our mother tongue called ‘‘Sanskrit’’. It is an ANICIENT language.

All caste people respect their holy festivals.

Ex:- Hindus celebrate DASARA, DEEPAVALI {DIWALI}, UGADI etc., like this all caste people are celebrating festivals and expressing their devotion. In Hindus, mainly Brahmins who are devotee of lord Vishnu, they pray god by many names like Rama and Krishna and many other names. In Karnataka we celebrate DASARA as our main festival. It is nine days festival so it is called in SANSKRIT as NAVARATRI. Many people stay nine days of UPAVASA daily, night they will take food.

Like this some devotees are celebrating this festival and tenth day evening all people gathered in front of the temple, they celebrate a festival called “BANNI” festival. There is a very good reason for celebrating BANNI festival because that day all enemies become friends. In MYSORE palace they celebrate BANNI to SHRI CHAMUNDESWARI DEVI. Ninth day some people will celebrate a

festival called" AYUDHA POOJA". Some people will celebrate on tenth day also that day the people who have some weapons, they keep weapons for POOJA but some people who don't have weapons they keep some religious books and PANCHANGAS etc. Like this all our Karnataka people celebrate a big festival called "DASARA". Nowadays many of the people are visiting to MYSORE to see the famous DASARA festival in MYSORE palace. Most of the people spend their OCTOBER holidays with their family in MYSORE.

The second most and famous festival is DIWALI {DEEP-AVALI} it comes after DASARA festival by the difference of 15 days. Mainly DIWALI is celebrated in Maharashtra very grandly. DIWALI is a festival of lightings and sky lamps. All people keep variety of lamps in front of their homes and it's a festival of women, many women will put Rangoli In front of their homes. DIWALI is celebrated for 3 days. From beginning of this festival people will put sky lamps for one month in frony of their homes. People enjoy this festival by bursting crackers.

Another most enjoyable festival celebrated is "GANESH CHATURTHI." Its celebration came from Maharashtra. This festival is grandly celebrated up to 5 days, 11 days and 21 days. But most of the people will celebrate their festival very grandly in their streets for 11 days. Most of the people also heartly welcome GANESHA in their homes for 5 days. On 11th day area devotees give send off to lord GANESHA by their songs and dance and mainly now a day's youngsters are very interested in dance in front of GANESHA

on this occasion of Ganesha visarjana. Lord GANESHA'S favorite food is modaka. All devotees prepare 108 to1008 modakas to GANESHA for naivedyam. Like this our people will celebrate this festival. It comes before DASARA.

These are the three biggest festivals that many people are celebrating and nowadays all people are celebrating these three main festivals. In their festivals most of the people will have lot of enjoyment with area members and their family. Apart from these three festivals there are many other festivals celebrated in INDIA. In these festivals, parents teach to their children about culture and our PHILOSOPHY. We all read about these three big festivals and about their values and good messages, so like this our INDIA is called by the names like cultural country, festivals country.

Nowadays foreign people are interested to study our culture and they also try to know about god and his values. So when we compare INDIA to all other foreign countries, we are very glad that we have taken birth in this cultural country and we all say very gladly about our country and culture.

ALWAYS BE PROUD THAT YOU ARE AN INDIAN

★★★

# Kapil Dev RamLal Nikhanj

**-Aniruddha Deshpande,**

Today I am going to narrate a poor boy's story. He is one and only Kapil Dev.

He was born on 6th January 1959 in Chandigarh. His full name is Kapil Dev Ramlal Nikhanj. He was born on a cold winter morning. Thankfully it was recorded as his birth day because even his brother was also born on the same day. Kapil's family was very big. He grew up with four sisters and two brothers. His only wish was to travel around the world in a Mercedes Benz. He has said that he used to spend all his time with friends stealing fruits off his neighbour's tree. His friends and he had stolen 93 pomegranates from his neighbour's tree. He was not a studious child, he used to bunk classes and play games like football etc. He spent his time is athletics where he could use energy. He was fairly good at all games. But his dream was to become a footballer. Fortunately all his friends were interested in and played cricket and they convinced him to change his game.

That was a decision he will always be grateful to them. After that he participated in so many interschool tournaments. He became famous as a promising lad in local media. Then his career started to change. Kapil played in Ranji champions in 1990-91. He played with Sachin, Vijay yadav, Chandrakant Pandit etc. Kapil

took 3 wickets and won the Ranji cup. Dev captained the Indian Cricket team that won the 1983 world cup. He was holding the world record for the most numbers of wickets taken in Test cricket. He is the first player to take 200 ODI wickets. He is the only player in the history of cricket to have taken more than 400 wickets (434) and scored more than 5000 runs in tests. On 11 March 2010 Kapil Dev was inducted into the ICC cricket Hall of Fame. He took retirement in 1994. He got Arjuna Award in 1980, Padmashri in 1982, Padmabhushan in 1991. All his Achievements are a great inspiration to the young generation like us.

# SANSKRIT

- Sanket kulkarni

India is a cultural country. In ancient days INDIA'S national language was Sanskrit, it is called as "DEVA BHASHA" because all gods talk in sanskrit. In ancient days we got all religious and epic books written in sanskrit only they are all written in manuscripts. All manuscripts are saved by saints and some religious people. In ancient days all people were conversing in sanskrit only. This language has its own script called Devanaagari lipi." After this all people named this language as Sanskrit." Now a days some are studying this language in schools and colleges. Most of the people know this language as ancient language so they are not interested to study and they think that sanskrit is most tough language. Some people confused that it should be studied by only Brahmins. But, now in this generation some people including girls also study this language. In ancient days only Brahmin boys were studying, but in this generation girls also study sanskrit but only general sanskrit. Brahmin boys study vedas and philosophies.

Girls have no permission to study veda and philosophies from ancient days. Presently sanskrit has so much value in India. In other foreign countries like Germany and United States. In German universities they started separate section for sanskrit. In that most

of the foreign people are also studying sanskrit and they have got degrees and after that they research about sanskrit manuscripts and some famous epics like Mahabharatha and Ramayana. Last year I heard about German people that most of the people are interested to study and research about this language. Another good news is that some of the people fluently talk in sanskrit and after the class also they do conversation in sanskrit only, but sad news is Indian people are neglecting this language. Other countrY people know the value of sanskrit and they study with great intrest.

Like this many countries are following our culture and language but Indians hesitate to follow our culture and language. In this generation some Indian people know the value of sanskrit as other countries people are following it. Now we got a great prime minister "Narendra Modi". He is always supporting our culture and mainly sanskrit. He declared that in all schools and colleges they must teach sanskrit and some cultural activities. Like this our PM is giving support to sanskrit.

In India many sanskrit universities are established and still they are all working also. In Karnataka also we have one sanskrit university that is located in capital city Bangalore it is named as "Karnataka Sanskrit university". Under this university many sanskrit colleges are opened and they are all successfully working.

Many students are studying sanskrit and they all do degrees in that, mainly now a days girls also get master degrees in sanskrit. At present in Karnataka the famous sanskrit college in located in Udupi. It is an ancient college. Another college is located in Bangalore. In both the colleges many students, not only Brahmins including all caste boys and girls are studying sanskrit and many people get doctorate in this language. All over Karnataka many schools and colleges have sanskrit as one subject, mainly some students are decided to take sanskrit from 8th standrad only because its a scoring subject in sslc, same as in puc also. Another ancient university is located in Dharwad, it is named as Karnataka university. In this university also separate sanskrit section is there. Dharwad is known as vidhya kashi from ancient days. Long time ago this university started a famous college in Karnataka college. It is famous by short name ksd. In this college many students are studying sanskrit and they get higher degrees studying this language.

Like this our country people know the value of sanskrit and now they have started to study the language and some famous epics. Mainly now a days many lecturer's posts are vacant. Many colleges call for people to these lecturer's posts. Another most famous and cultural college is located in capital city that is "Poorna Prajna Vidyapeetha". This college is working since last 60 years. It was established by "Shri Viswesha Theertha Swamiji", who is a saint of Pejawara mutt. Now in this education institution 300 students are studying Dwaitha' philosophy. The founder of this philosophy is

"Shri Jagadguru Madwacharya".

Like this our ancient language has many values, here I have given some examples and still more matters are there to write. Now onwards all people should save our ancient language and we should study and teach to the next generation.

BE PROUD TO BE AN INDIAN

# Matter, Space, and Time: A Comparative Analysis of Scientific and Vedic Perspectives

**Author: dr. Srinidhi V**

***Research Scholer.***

***VVSRI. New Dehli***

**Abstract**

Science pursues the real world perceivable or deducible through observation and cognitive faculties. This reality comprises three fundamental components: Matter, Space, and Time. Modern science, grounded in Einstein's Theory of Relativity and Hubble's observations, postulates an expanding universe that implies a definite beginning (Big Bang) and a potential end. While science suggests that matter, space, and time originated from a singularity of infinite density, it faces limitations in describing the state prior to this event due to the breakdown of physical laws.

The Vedic view does not oppose the scientific perspective but complements it by illuminating the state of affairs at and before the Big Bang. It posits that Matter (*Prakriti*) is eternal in its subtle form, though its transformations are impermanent. Time (*Kala*), as a flow, is eternal, though specific moments have a beginning and end. Space (*Akasha*) is dual in nature: created as a product of matter (*Bhutakasha*) but eternal as the seat of existence (*Pradesha*). This paper argues that these insentient entities require the motivation of a Supreme Sentient Being (God) and that integrating scientific in-

quiry with spiritual knowledge is essential for a holistic understanding of existence.

Keywords: *Cosmology, General Relativity, Quantum Mechanics, Prakriti, Akasha, Kala, Big Bang, Vedanta.*

## 1. Introduction

The human quest for knowledge is directed toward understanding the reality of the world, which manifests primarily through Matter, Space, and Time. Direct perception and scientific deduction have allowed humanity to map the physical universe. However, as science pushes the boundaries of the macroscopic (cosmology) and the microscopic (quantum mechanics), it encounters limits where physical laws become inadequate. This paper explores the definitions and nature of matter, space, and time from the standpoint of modern physics and contrasts them with the metaphysical insights provided by ancient Vedic wisdom.

## 2. The Scientific Perspective

### 2.1. Matter

In physics, matter constitutes objects existing in solid, liquid, or gaseous states. Fundamentally, matter is composed of atoms and molecules packed with interstitial space.

Atomic Structure: The atom consists of protons, neutrons, and electrons. Protons and neutrons are further composed of quarks (up, down, etc.), which can be viewed as energy packets.

**Wave-Particle Duality:** Electrons behave more like waves than particles. They are held in orbit by nuclear fields, suggesting that matter is essentially a manifestation of quantum fields.

**Quantum Fields:** Space is not empty but filled with un-manifest quantum fields. These fields are active, continuously creating virtual particles. When sufficient energy is available, stable particles emerge, marking the birth of matter.

## 2.2. Space

Science rejects the notion of space as a mere void.

**Manifest Fields:** Space is occupied by classical fields such as gravity and electromagnetism (e.g., radio waves, magnetic fields).

**Non-local Fields:** Quantum fields pervade all space-time. The interaction between these fields and energy leads to the creation of material reality. Hence, objects are essentially formed of both matter and space.

## 2.3. Time and Space-Time

Time is the fourth dimension required to describe events, continuity, and duration.

**Relativity:** Unlike three-dimensional spatial coordinates, time is not absolute. Einstein's General Theory of Relativity establishes that "simultaneity" is relative. For observers at vast astronomical distances moving at relative speeds, the time of an event depends on the observer's position and velocity.

The Space-Time Continuum: Because spatial and temporal dimensions are interrelated, modern astronomy treats them as a single entity: Space-Time.

## 2.4. Cosmology: The Big Bang and Singularity

Based on Hubble's observation of expanding galaxies, science proposes the Big Bang Theory.

Singularity: The universe began from a point of infinite density where matter, space, and time were condensed into a "Big Crunch."

Limitations: At this singularity, classical laws of physics fail. As Stephen Hawking noted, the gravitational field becomes so strong that quantum gravitational effects become dominant, yet a consistent theory combining gravity and quantum mechanics remains elusive.

## 3. The Vedic Perspective

Vedic philosophy offers a metaphysical framework that addresses the origins and fundamental nature of these three components.

## 3.1. Matter (Prakriti)

Vedic thought describes matter as *Prakriti*.

Dual Nature: In its subtle, un-manifest form (*Pradhana*), Prakriti is eternal. In its manifest form (*Vyakta*), it undergoes transformation, evolving into the universe.

Evolution: Creation begins when the balance of the three *Gu-*

*nas* (Sattva, Rajas, Tamas) is disturbed by the will of God (*Brahman*). This leads to the evolution of *Tattvas* (principles), including *Mahat* (cosmic intelligence), *Ahamkara* (ego), and the *Panchabhutas* (five elements: earth, water, fire, air, space).

Symbiosis: The Vedic view aligns with the modern *Gaia Hypothesis*, suggesting that the Earth functions like a living organism where geochemical and biological processes are symbiotic, regulated by a superior conscious principle (*Chit-Prakriti*).

## 3.2. Space (Akasha)

The Vedas present a nuanced view of space, resolving the dichotomy of it being both created and eternal.

Pradesha (Eternal Space): This is the unconditioned seat of existence (*Adhishthana*). It has no beginning or end and is the background against which creation occurs.

Bhutakasha (Created Space): This is the space that accommodates elements and objects. It is considered "created" in the sense that it becomes particularized (*Vishesha*) when in contact with matter. As stated in the *Taittiriya Upanishad*, "From Atman, space was born." This refers to the conditioned space that expands and contracts.

## 3.3. Time (Kala)

Time is perceived as the progress of existence.

**Eternal Flow vs. Moments:** As a continuous flow, Time is eternal. However, specific units of time (moments, days, years) are created entities (*Kala-visheshah*).

**The Divine Will:** Time is not an independent entity but a manifestation of God's will. It is the witness to all activities. The *Rig Veda* describes Time as a wheel set in motion by God, sustaining the rhythms of the universe (seasons, days, and nights). God is thus referred to as *Kalatma* (the Soul of Time).

## 4. Synthesis: The Theological Dimension

Science excels in explaining the *behavior* of the universe—the "how." However, it often hits a wall of inconceivability regarding the "why" and the ultimate "cause."

**Inconceivability:** Concepts like the infinite divisibility of atoms or the nature of Singularity are intellectually inconceivable without metaphysical intuition.

**Role of God:** Vedic philosophy posits that Matter, Space, and Time are insentient (*Jada*). They require a sentient motivator. This role is fulfilled by the Supreme Lord (*Brahman/Vishnu*) and His conscious power (*Chit-Prakriti* or *Lakshmi*).

